
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

E

दाखल क्र. M:2499 विषय संस्कृत काव्य

नाव रामायण अयोध्याकांड

लेखक / लिपीकार

पृठ 45 काळ पूर्ण / अपूर्ण

m.2499

॥अयोध्याकांड प्रारंभः॥

अयो॰ स॰ १ श्रीगणेशायनमः महादेवउवाच एकदासुखमासीनंरामंस्वांतःपुराजिरे सर्वाभ
१ रणसंपन्नंरत्नसिंहासनेस्थितं १ नीलोत्पलदलश्यामंकौस्तुभामुक्तकंधरं सी
तयारत्नदंडेनचामरेणाथवीजितं २ विनोदयंतंतांबूलचर्वणादिभिरादरात्
नारदोवातरद्द्रष्टुमंबराद्यत्रराघवः ३ शुद्धस्फटिकसंकाशः शरच्चंद्रइवामलः
अतर्कितमुपायातोनारदोदिव्यदर्शनः ४ तंदृष्ट्वासहसोत्थायरामःप्रीत्याकृतांज
लिः ननामशिरसाभूमौसीतयासहभक्तिमान् ५ उवाचनारदंरामःप्रीत्यापरया म
युतः संसारिणांमुनिश्रेष्ठदुर्लभंतवदर्शनं ६ अस्माकंविषयासक्तचेतसांनितरां
मुने अवाप्तंमेपूर्वजन्मकृतपुण्यमहोदयैः ७ संसारिणापिहिमुनेलभ्यतेसत्स १ राम
मागमः ८ अतस्त्वद्दर्शनादेवकृतार्थोस्मिमुनीश्वर किंकार्यंतेमयाकार्यंब्रूहित

त्करवाणि भोः ८ अथ तं नारदोऽप्याह राघवं भक्तवत्सलं॥ किं मोहयसि मां राम वाक्यै-
र्लोकानुसारिभिः ९ संसार्यहमिति प्रोक्तं सत्यमेव त्वया विभो जगतामादि
भूता या सा माया गृहिणी तव १० त्वत्सन्निकर्षाज्जायंते तस्यां ब्रह्मादयः प्रजाः त्व
दाश्रया सदा भाति माया या त्रिगुणात्मिका ११ सूते ऽजस्रं शुक्लकृष्णलोहिताः स
र्वदा प्रजाः लोकत्रयमहागेहे गृहस्थस्त्वमुदाहृतः १२ त्वं विष्णुर्जानकी लक्ष्मीः
शिवस्त्वं जानकी शिवा ब्रह्मा त्वं जानकी वाणी सूर्यस्त्वं जानकी प्रभा १३ भवान् शशांकः
सीता तु रोहिणी शुभलक्षणा शक्रस्त्वमेव पौलोमी सीता स्वाहानलो भवान् १४ यम
स्त्वं कालरूपश्च सीता संयमनी प्रभो निर्ऋतिस्त्वं जगन्नाथ तामसी जानकी शुभा १५
राम त्वमेव वरुणो भार्गवी जानकी शुभा वायुस्त्वं राम सीता तु सदागतिरितीरिता १६

अयो॰कां२सं१ कुबेरस्त्वंरामसीतासर्वसंपत्प्रकीर्तिता रुद्राणीजानकीप्रोक्तारुद्रस्त्वंलोकनाशकृत्
१७ लोकेस्त्रीवाचकंयद्यत्तत्सर्वंजानकीशुभा पुन्नामवाचकंयावत्तत्सर्वंत्वंहिराघ
२ व॰ १८ तस्माल्लोकत्रयेदेवयुवाभ्यांनास्तिकिंचन १९ त्वदाभासोदिताज्ञानमव्या
कृतमितीर्यते तस्मान्महांस्ततः सूत्रंलिंगंसर्वात्मकंततः २० अहंकारश्चबुद्धिश्चपं
चप्राणेंद्रियाणिच लिंगमित्युच्यतेप्राज्ञैर्जन्ममृत्युसुखादिमत् २१ सएवजीवसंज्ञ
घविं६ श्चलोकेभातिजगन्मयः अवाच्यानाद्यविद्यैवकारणोपाधिरुच्यते २२ स्थूलंसूक्ष्मंका
रणाख्यमुपाधित्रितयंचितेः एतैर्विशिष्टोजीवःस्याद्वियुक्तःपरमेश्वरः २३ जाग्र हृ७
स्या८ त्स्वप्नसुषुप्त्याख्यासंसृतिर्याप्रवर्त्तते तस्याविलक्षणःसाक्षीचिन्मात्रस्त्वंरघूत्तम २४
त्वत्तएवजगज्जातंत्वयिसर्वंप्रतिष्ठितं त्वय्येवलीयतेकृत्स्नंतस्मात्त्वंसर्वकारणं २५ २ राम

रज्जावहिमिवात्मानंजीवंज्ञात्वाभयंभवेत् परात्माहमितिज्ञात्वाभवदुःखैर्विमुच्यते
२६ चिन्मात्रज्योतिषासर्वाःसर्वदेहेषुबुद्धयः त्वयायस्मात्प्रकाश्यंतेसर्वस्यात्माततो य
भवान् २७ अज्ञानान्न्यस्यतेसर्वंत्वयिरज्जौभुजंगवत् त्वज्ज्ञानाल्लीयतेसर्वंत
स्माज्ज्ञानंसदाभ्यसेत् २८ त्वत्पादभक्तियुक्तानांविज्ञानंभवतिक्रमात् तस्मात्त्व
द्भक्तियुक्तायेमुक्तिभाजस्तएवहि २९ अहंत्वद्भक्तभक्तानांचकिंकरः अतोमामनुग तद्भक्तानां
ह्णीष्वमोहयस्वनमांप्रभो ३० त्वन्नाभिकमलोत्पन्नोब्रह्मामेजनकःप्रभो अतस्तवा
हंपौत्रोस्मिभक्तंमांपाहिराघव ३१ इत्युक्त्वाबहुशोनत्वास्वानंदाश्रुपरिप्लुतः उवा
८ रा चवचनंरामंब्रह्मणानोदितोस्म्यहं ३२ रावणस्यवधार्थायजातोसिरघुसत्तम इदा
नींराज्यरक्षार्थंपितात्वामभिषेक्ष्यति ३३ यदिराज्याभिसंसक्तोरावणंनहनिष्यसि॥

अयो·स·१ प्रतिज्ञानेकृनारामभूभारहरणायवै ३४ नतस्त्वंकुरुराजेंद्रसत्यसंधस्त्वमेवहि श्र कां·२
२ तैनदृदितंरामोनारदंप्राहसस्मितं ३५ श्रुणुना रदमेकिंचिद्विद्यतेविदितंक्वचित्
प्रतिज्ञातंचयत्पूर्वंकरिष्येतन्नसंशयः ३६ किंतुकालानुरोधेनतत्तत्प्रारब्धसंक्षया
त् हरिष्येसर्वभूभारंक्रमेणासुरमंडलं ३७ रावणस्यविनाशार्थंश्वोगंतादंडकान
नं चतुर्दशसमास्तत्रह्युषित्वामुनिवेषधृक् ३८ सीतामिषेणतंदुष्टंसकुलंनाश
याम्यहं एवंरामेप्रतिज्ञातेनारदःप्रमुमोदह ३९ प्रदक्षिणत्रयंकृत्वादंडवत्प्रणिप
त्यतं अनुज्ञातश्चरामेणययौदेवगतिंमुनिः ४० संवादंपठतिश्रृणोतिसंस्मरेद्वा
योनित्यंमुनिवररामयोःसभक्त्यासंप्राप्नोत्यमरसुदुर्लभंविमोक्षंकैवल्यंविरति
पुरःसरंक्रमेण ४१ ॥इतिश्रीमदध्यात्मरामायणेअयोध्या·उमाम·सं·प्रथमस·१ २

श्रीमहादेव उवाच अथ राजा दशरथः कदाचिद्रहसि स्थितः वसिष्ठं स्वकुलाचार्यमा
हूयेदमभाषत १ भगवन्राममखिलाः प्रशंसंति मुहुर्मुहुः पौराश्च नैगमा वृद्धा मंत्रि
णश्च विशेषतः २ ततः सर्वगुणोपेतं रामं राजीवलोचनं ज्येष्ठं राज्येभिषेक्ष्यामि वृद्धो
हं मुनिपुंगव ३ भरतो मातुलं द्रष्टुं गतः शत्रुघ्नसंयुतः अभिषेक्ष्ये अद्य एवाशु भवां
स्तच्चानुमोदतां ४ संभाराः संभ्रियंतां च गच्छ मंत्रय राघवं उच्छ्रीयंतां पताकाश्च ना
नावर्णाः समंततः ५ तोरणानि विचित्राणि स्वर्णमुक्तामयानि च आहूय मंत्रिणं रा
जा सुमंत्रं मंत्रिसत्तमं ६ आज्ञापयति यद्यन्मां मुनिस्तत्तत्समानय यौवराज्येभिषे
क्ष्यामि श्वोभूते रघुनंदनं ७ तथेति हर्षात्स मुनिं किं करोमीत्यभाषत तमुवाच
महातेजा वसिष्ठो ज्ञानिनां वरः ८ श्वः प्रभाते मध्यकक्ष्यें कन्यकाः स्वर्णभूषिताः
क्षे

तिष्ठंतु षोडशा गजाः स्वर्णरत्नादिभूषिताः ९ चतुर्दंतः समायातु ऐरावतकुलोद्भवः
नानातीर्थोदकैः पूर्णाः स्वर्णकुंभाः सहस्रशः १० स्थाप्यंतां नव वैयाघ्रं च मणित्रीणि
चानय श्वेतछत्रं रत्नदंडं मुक्तामणिविराजितं ११ दिव्यमाल्यानि वस्त्राणि दिव्यान्या
भरणानि च मुनयः सत्कृतास्तत्र तिष्ठंतु कुशपाणयः १२ नर्तक्यो वारमुख्याश्च गा
यका वैणुकास्तथा नानावादित्रकुशला वादयंतु नृपांगणे १३ हस्त्यश्वरथपादा
ता बहिस्तिष्ठंतु सायुधाः नगरे यानि तिष्ठंति देवतायतनानि च १४ तेषु प्रवर्त्यतां
पूजा नानाबलिभिरावृता राजानः शीघ्रमायांतु नानोपायनपाणयः १५ इत्यादि
श्य मुनिः श्रीमान् सुमंत्रं नृपमंत्रिणं स्वयं जगाम भवनं राघवस्यातिशोभनं १६ र ४
थमारुह्य भगवान् वसिष्ठो मुनिसत्तमः त्रीणि कक्ष्याण्यतिक्रम्य रथात् क्षितिमवात्
क्ष्या

रत् १७ अंतःप्रविश्यभवनंस्वाचार्यत्वादवारितः गुरुमागतमाज्ञायरामस्तूर्णंकृतां
जलिः १८ प्रत्युद्गम्यनमस्कृत्यदंडवद्भक्तिसंयुतः स्वर्णपात्रेणपानीयमानिनायाशु
जानकी १९ रत्नासनेसमावेश्यपादौप्रक्षाल्यभक्तितः तदपःशिरसाधृत्वासीत्तयासहरा
घवः २० धन्योस्मीत्यब्रवीद्रामस्तवपादांबुधारणात् श्रीरामेणैवमुक्तस्तुप्रहसन्मुनि
रब्रवीत् २१ त्वत्पादसलिलंधृत्वाधन्योभूद्गिरिजापतिः ब्रह्मापिमत्पिताते हि पादतीर्थ
हताशुभः २२ इदानींभाषसेयत्त्वंलोकानामुपदेशकृत् जानामित्वांपरात्मानंलक्ष्म्यासं
जातमीश्वरं २३ देवकार्यार्थसिध्यर्थंभक्तानांभक्तिसिद्धये रावणस्यवधार्थायजातंजा
नामिराघव २४ तथापिदेवकार्यार्थंगुह्यंनोद्घाटयाम्यहं यथात्वंमाययासर्वंकरोषिर
घुनंदन २५ तथैवानुविधास्येहंशिष्यस्त्वंगुरुरप्यहं गुरुर्गुरूणांत्वंदेवपितॄणांत्वंपिता

महः २६ अंतर्यामिजगद्यंत्रवाहकस्त्वमगोचरः शुद्धसत्वमयंदेहंधृत्वास्वाधीनसंभ
वं २७ मनुष्यवल्लोकेस्मिन्भासित्वंयोगमायया पौरोहित्यमहंजानेविगर्ह्यंदूष्यजी
वनं २८ इक्ष्वाकूणांकुलेरामः परमात्माजनिष्यते इतिज्ञातंमयापूर्वंब्रह्मणाकथितंपुरा
२९ ततोहमाशयारामतवसंबंधकांक्षया अकार्षंगर्हितमपि तवाचार्यत्वसिद्धये
३० ततोमनोरथोमेद्यफलितोरघुनंदन त्वदधीनामहामायासर्वलोकैकमोहि
नी ३१ मांयथामोहयेन्नैवतथाकुरुरघूद्वह गुरुनिष्कृतिकामस्त्वंयदिदेह्येतदेव
मे ३२ प्रसंगात्सर्वमप्युक्तंनवाच्यंकुत्रचिन्मया राज्ञादशरथेनाहंप्रेषितोस्मिर
घूद्वह ३३ त्वामामंत्र्यपितूराज्ये श्वोभिषेक्ष्यतिराघवः अद्यत्वंसीतयासार्धमुप
वासंयथाविधि ३४ कृत्वाशुचिर्भूमिशायीभवरामजितेंद्रियः गच्छामिराजसान्नि

ध्यं त्वं तु प्रातर्गमिष्यसि ३५ इत्युक्त्वा रथमारुह्य ययौ राजगुरुर्द्रुतं रामोपि लक्ष्मणं
दृष्ट्वा प्रहसन्निदमब्रवीत् ३६ सौमित्रे यौवराज्ये मेऽभिषेको भविष्यति निमित्तमा
त्रमेवाहं कर्ता भोक्ता त्वमेव हि ३७ मम त्वं हि बहिःप्राणो नात्र कार्या विचारणा ततो व
सिष्ठेन यथा भाषितं तत्तथाकरोत् ३८ वसिष्ठोपि नृपं गत्वा कृतं सर्वं न्यवेदयत् वसि
ष्ठस्य पुरो राज्ञा ह्युक्तं रामाभिषेचनं ३९ यदा तदैव नगरे श्रुत्वा कश्चित्पुमान्जगौ न्यवेदयत्
कौशल्यायै राममात्रे सुमित्रायै तथैव च ४०ˇ लक्ष्मीपर्यचरद्देवी रामस्यार्थप्रसिद्धये
सत्यवादी दशरथः करोत्येव प्रतिश्रुतं ४१ कैकेयी वशगः किं तु कामुकः किं करिष्यति।
इति व्याकुलचित्ता सा दुर्गां देवीमपूजयत् ४३ एतस्मिन्नंतरे देवा देवीं वाणीमचोद
यन् गच्छ देवि भुवो लोकमयोध्यायां प्रयत्नतः ४४ रामाभिषेकविघ्नार्थं यतस्व
ब्रह्मवचनात् ४ श्रुत्वा तेहर्षसंपूर्णेद दतुर्हारमुत्तमम्॥ तस्मै ततः प्रीतमनाः कौशल्या पुत्रवत्सला॥१॥

अयो·स·२ ब्रह्मवाक्यतः मंथरांप्रविश्यास्वादोषैकैकेयींचततःपरं ४५ ततोविघ्नेसमुत्पन्नेपुनरे
६ हिदिवंशुभे तथेत्युक्त्वातथाचक्रेप्रविवेशाथमंथरां ४६ सापिकुब्जात्रिवक्रातुप्रा
सादाग्रमथारुहत् नगरंपरितोदृष्ट्वासर्वतःसमलंकृतं ४७ नानातोरणसंबा
धंपताकाभिरलंकृतं सर्वोत्सवसमायुक्तंविस्मितापुनरागमत् ४८ धात्रींप
प्रच्छमातःकिंनगरंसमलंकृतं नानोत्सवसमायुक्ताकौशल्याचातिहर्षिता ४९
ददातिविप्रमुख्येभ्योवस्त्राणिविविधानिच तामुवाचतदाधात्रीरामचंद्रा
भिषेचनं ५० श्वोभविष्यतितेनाद्यसर्वतोलंकृतंपुरं तच्छ्रुत्वात्वरितागत्य
कैकेयींवाक्यमब्रवीत् ५१ पर्यंकस्थांविशालाक्षीमेकांतेपर्यवस्थितां किं ६ राम
शेषेदुर्भगेमूढेमहद्भयमुपस्थितं ५२ नजानीषेत्तिसौंदर्यमानिनीमत्तगा

मिनी ५३ रामस्यानुग्रहाद्भ्रातुः श्वोभिषेको भविष्यति तच्छ्रुत्वा सहसोत्थाय
कैकेयी प्रियवादिनी ५४ तस्यै दिव्यं ददौ स्वर्णनूपुरं रत्नभूषितं हर्षस्थाने
किमिति मे कथ्यते भयमागतं ५५ भरताद्धिको रामः प्रियकृन्मे प्रियंवदः कौ
शल्यां मां समं पश्यन् सदा शुश्रूषते हि मां ५६ रामाद्भयं किमापन्नं तवमूढे व
दस्व मे तच्छ्रुत्वा विषसादाथ कुब्जा कारणवैरिणी ५७ शृणु मद्वचनं देवि वि
ni थार्थं ते महद्भयं त्वां तोषयन् सदा राजा प्रियवाक्यानि भाषते ५८ कामुकोऽन
थ्यवादी च त्वां वाचा परितोषयन् कार्यं करोति तस्यैव राममातुः सुपुष्कलं ५९
मनस्येतन्निधायैव प्रेषयामास ते सुतं भरतं मातुलकुले प्रेषयामास सानुजं ६०
सुमित्रायाः समीचीनं भविष्यति न संशयः लक्ष्मणो राममन्वेति राज्यं सोऽनुभवि

कारणेन त्वाणी भवे शरूपेण वैरिणी वैर भावपन्ना ५
अति दुःखावेप्रप्रेषयामा सेति पुनरुक्तिर्दोषाय

ष्यति ६१ भरतोराघवस्याग्रेकिंकरोवाभविष्यति विवास्यतेवानगरात्प्राणैर्वाह 

७ प्यतेचिरात् ६२ त्वंतुदासीवकौशल्यांनित्यंपरिचरिष्यसि ततोपिमरणंश्रेयो

यत्सपत्न्याःपराभवः ६३ अतःशीघ्रंयतस्वाद्य भरतस्याभिषेचने रामस्यवन त ३

वासार्थंवर्षाणिनवपंचच ६४ ततोरूढोभयेपुत्रस्तवराज्ञिभविष्यति उपा अभयेभयरहिते राज्येतवपुत्रोरूढो दृढोभविष्यति

यंतेप्रवक्ष्यामिपूर्वमेवसुनिश्चितं ६५ पुरादेवासुरेयुद्धेराजादशरथःस्वयं।

इंद्रेणयाचितोधन्वीसहायार्थंमहारथः ६६ जगामसेनयासार्धंत्वयासह

शुभानने युद्धंप्रकुर्वतस्तस्यराक्षसैःसहधन्विनः ६७ तदाक्षकीलोन्यपतत्

छिन्नस्तस्यनवेदसः त्वंतुहस्तंसमावेश्यकीलरंध्रेतिधैर्यतः ६८ स्थितवत्य 

सितापांगिपतिप्राणपरिप्सया ततोहत्वासुरान्सर्वान्दृष्ट्वात्वामरिंदमः ६९

हेसुव्रतेमंदिरंव्रजेति उक्त्वानितिशेषः

आश्चर्यंपरमंलेभेतामालिंग्यमुदान्वितः वृणीष्वयत्तेमनसिवांछितंवरदोस्म्यहं
७० वरद्वयंचरणेष्वतमेवंराजावदत्स्वयं त्वयोक्तोवरदोराजन्यदिदत्तंवरद्वयं
७१ त्वय्येवतिष्ठतुचिरंन्यासभूतंममानघ यदामेवसरोभूयात्तदादेहिवरद्वयं
७२ तथेत्युक्त्वास्वयंराजामंदिरंव्रजसुव्रते त्वत्तःश्रुतंमयापूर्वमिदानींस्मृति
मागतं अतःशीघ्रंप्रविश्याद्यक्रोधागारंरुषान्विता ७३ विमुच्यसर्वाभरणंस
र्वतोविनिकीर्यच भूमावेवशयानात्वंतूष्णीमातिष्ठभामिनि ७४ यावत्सत्यंप्रति
ज्ञायराजाभीष्टंकरोतिते श्रुत्वात्रिवक्रयोक्तंतत्तदाकेकयनंदिनी ७५ तथ्यमेवा
खिलंमेनेदुःसंगाद्धितविभ्रमा तामाहकैकयीहृष्टाकुतस्तेबुद्धिरीदृशी ७६ एवं
त्वांबुद्धिसंपन्नांनजानेवक्रसुंदरि भरतोयदिराजामेभविष्यतिसुतःप्रियः ७७

अयो॰स॰२ नू ग्रामेऽत्र नेष्प्रदास्यामिमस्त्वं प्राणवल्लभा इत्युक्त्वाकोपभवनं प्रविश्य सहसारुषा कांड २

८ ७८ विमुच्य सर्वाभरणं प्रकीर्य समंततः भूमौशयाना मलिनामलिनांबरधारिणी

७९ प्रोवाचशृणु मेकुब्जे यावद्रामोवनं व्रजेत् प्राणांस्त्यक्ष्ये थवा वक्रे शयिष्यतत्र

णं देवहि ८० निश्चयं कुरु कल्याणि कल्याणं ते भविष्यति इत्युक्त्वा प्रययौ कुब्जागृहं

साहितथाकरोत् ८१ धीरोऽत्यंतदयान्वितोऽपि सगुणाचारान्वितोवाथवानीतिज्ञो।

विधिवाददेशिकपरोविद्याविवेकोथवा दुष्टानामतिपाप भावितधियां दयान्वितो

पिसगुणसंगं सदा चेद्भजेत्तदुर्ह्यापदि भावितोव्रजतितत्साम्यं क्रमेण स्फुटं ८२

अंतःसंगः परित्याज्योदुष्टानांसर्वदैवहि दुःसंगीच्यवतेस्वार्थाद्यथेयं राजकन्यका

८३ इति श्रीअयोध्याकांडे उमामहेश्वरसंवादे द्वितीयसर्गः॥ २॥ श्रीमहादेवउ॥ ८

ततोराजादशरथोरामाभ्युदयकारणात् आदिश्यमंत्रीप्रकृतीःसानंदोगृहमावि
शत् १ तत्राऽदृष्ट्वाप्रियांराजाकिमेतदितिविह्वलः यापुरामंदिरंतस्याःप्रविष्टेम
यिशोभना २ हसंतीमामुपायातिसाकिंनैवाद्यदृश्यते ३ इत्यात्मन्येवसंचिंत्यम
नसातिविदूयता ३ पप्रच्छदासीनिकरंकुतोवःस्वामिनीशुभा नायातिमांयथा
पूर्वंमत्प्रियाप्रियदर्शना ४ ताऊचुःक्रोधभवनंप्रविष्टानैवविद्महे कारणंतत्रदे
वत्वंगत्वानिश्चेतुमर्हसि ५ इत्युक्तोभयसंत्रस्तोराजातस्याःसमीपगः उपवि
श्यशनैर्देहंस्पृशन्वैपाणिनाब्रवीत् ६ किंशेषेवसुधापृष्ठेपर्यंकादीन्विहायच
मांत्वंखेदयसेभीरुयन्मांनावभाषसे ७ अलंकारंपरित्यज्यभ्रमोमलिनवा
ससा किमर्थंब्रूहिसकलंविधास्येतववांछितं ८ कोवानवाहितंकर्तानारीवापु

अयो॰ स॰ ३ रूषोपिवा समेदंअश्रुवध्यश्च भवितेति न संशयः ९ ब्रूहि देवि यथाप्रीतिरुत्पद्यते मम मानसे तदिदानीं साधयिष्ये सुदुर्लभमपि क्षणात् १० जानासित्वं मम स्वान्तं प्रियं मां त्वद्वशे स्थितं तथापि मां खेदयसे वृथा तव परिश्रमः ११ ब्रूहि कं धनिनं कुर्यां दरिद्रं ते प्रियंकरं धनिनं क्षणमात्रेण निर्धनं च तवाहितं १२ ब्रूहि कं त्वा वधिष्यामि वधार्हं वा विमोक्ष्यते किमत्र बहुनोक्तेन प्राणान्दास्यामि ते प्रिये १३ मम प्राणास्त्रियस्तमेरामो राजीवलोचनः तस्योपरि शपे ब्रूहि त्वद्धितं तत्करोम्यहं १४ इति ब्रुवाणे राजानं शपथं तं राघवोपरि ज्ञात्वैर्वि मृज्य नेत्रे सा राजानं प्रत्यभाषत १५ यदि सत्यप्रतिज्ञोसि शपथं कुरुषे यदि याञ्चां मे सफलां कर्तुं शीघ्रमेवत्वमर्हसि १६ पूर्वं देवासुरे युद्धे मया त्वं परिरक्षितः तदा वरद्वयं दत्तं त्वया मे

कां॰ २

१

ये३

१

तुष्टचेतसा १७ तद्द्वयंन्यासभूतंमेस्थापितंत्वयिसुव्रत नत्रैकेनवरेणाशुभरतं
मेप्रियंसुतं १८ एभिःसंभृतसंभारैर्यौवराज्येभिषेचय अपरेणवरेणाशुरामो
गछतुदंडकान् १९ मुनिवेषधरःश्रीमान्जटावल्कलभूषणः चतुर्दशस
मास्तत्रकंदमूलफलाशनः २० पुनरायातुतस्यांनेवनेवानिष्ठतुस्वयं प्रभातेग
दि छतुवनंरामोराजीवलोचनः २१ य किंचिद्विलंबेनप्राणांस्त्यक्ष्येतवाग्रतः
भवसत्यप्रतिज्ञस्त्वमेनदेवममप्रियं २१ श्रुत्वैतद्दारुणंवाक्यंकैकेय्यारोमह
र्षणं निपपातमहीपालोवज्राहतइवाचलः २२ शनैरुन्मील्यनयनेविमृज्य
परयाभिया दुःस्वप्नोवामयादृष्टोह्यथवाचित्तविभ्रमः २४ इत्यालोक्यपुरःप
तींव्याघ्रीमिवपुरस्थितां किमिदंभाषसेभद्रेममप्राणहरंवचः २५ रामःक

कां॰२

अयो॰स॰३ मपराधंतेकृतवान्कमलेक्षणः ममाग्रेराघवगुणान्वर्णयस्यनिशंशुभान्
१० २६ कौशल्यांमांसमंपश्यन्शुश्रूषांकुरुतेतदा इतिब्रुवंतीत्वंपूर्वमिदानींभा
षसेऽन्यथा २७ राज्यंग्रहाणपुत्रायरामास्तिष्ठतुमंदिरे अनुगृह्णीष्वमांवामे
रामन्नास्तिभयंतव २८ इत्युक्त्वाश्रुपरीताक्षःपादयोर्निपपातह केकेयीप्रत्यु
वाचेदंसापिरक्तांतलोचना २९ राजेंद्रकिंत्वंभ्रांतोसिउक्तंतद्भाषसेन्यथा मि
थ्याकरोषिचेत्स्वीयंभाषितंनरकोभवेत् ३० वनंनगच्छेद्यदिरामचंद्रःप्रभात
चौ ३ कालेऽजिनैरयुक्तः उद्बंधनंवाविषभक्षणंवाकृत्वामरिष्येपुरतस्तवाहं ३१
इं २ सत्यप्रतिज्ञोहमितीहलोकेविडंबसेसर्वसभांतरेषु रामोपरित्वंशपथंचकृत्वा
मिथ्याप्रतिज्ञोनरकंप्रयाहि ३२ इत्युक्तःप्रियायादीनोमग्नोदुःखार्णवेनृपः। १०

मूर्छितः पतितो भूमौ विसंज्ञो मृतको यथा २३ एवं रात्रिर्गता तस्य दुःखात्संव त्रि
त्सरोपमा अरुणोदयकाले तु बंदिनो गायका जगुः २४ निवारयित्वा तान्सु
र्वान्केकेयी रोषमास्थिता ततः प्रभातसमये मध्यकक्षामुपस्थिताः २५ ब्राह्म
णाः क्षत्रिया वैश्या ऋषयः कन्यकास्तथा छत्रं च चामरं दिव्यं गजो वाजी तथैव च
२६ अन्याश्च वारमुख्याः पौरा जानपदास्तथा वसिष्ठेन यथाज्ञप्तं तत्सर्वं
स्थितं तदा २७ स्त्रियो बालाश्च वृद्धाश्च रात्रौ निद्रां न लेभिरे कदा द्रक्ष्यामहे रामं पी
तकौशेयवाससं २८ सर्वाभरणसंपन्नं किरीटकटकोज्ज्वलं कौस्तुभाभरणं श्यामं कं
दर्पशतसुंदरं २९ अभिषिक्तं समायांतं गजारूढं स्मिताननं श्वेतछत्रधरं तत्र
लक्ष्मणं लक्षणान्वितं ४० रामं कदा वा द्रक्ष्यामः प्रभातं वा कदा भवेत् इत्युत्सुक

अयो॰स॰२ श्रियः सर्वेबन्धवः पुरवासिनः ४१ इदानीं सुप्तिनो राजा किमर्थं चेति चिंतयन् सुमंत्रः नो कां॰२
११ दनकैः प्रायाद्यत्र राजावतिष्ठते ४२ वर्द्धयन् जयशब्देन प्रणमन् शिरसा नृपं अति
खिन्नं नृपं दृष्ट्वा कैकेयीं समपृच्छत ४३ देवि कैकेयि वर्द्धस्व किं राजा दृश्यते न्यथा न
रा माह कैकेयी राजो [illegible]त्रौ निद्रां न लब्धवान् ४४ राम रामेति रामेति राममेवानुचिंतय
न् प्रजागरेण वै राजा ह्यस्वस्थ इव लक्ष्यते ४५ राममानय शीघ्रं त्वं राजा द्रष्टुमिह
च्छति ४६ सुमंत्र उवाच अश्रुत्वा राजवचनं कथं गच्छामि भामिनि तच्छ्रुत्वा मंत्रिणो
वाक्यं राजा मंत्रिणमब्रवीत् ४७ सुमंत्र रामं द्रक्ष्यामि शीघ्रमानय सुंदरं इत्युक्त
स्त्वरितं गत्वा सुमंत्रो राममंदिरं ४८ अवारितः प्रविश्यायं त्वरितं राममब्रवीत् शी
घ्रमागच्छ भद्रं ते राम राजीवलोचन ४९ पितुर्गेहं मया सार्धं राजा त्वां द्रष्टुमिच्छ ११

ति इत्युक्तो रथमारुह्य संभ्रमात्त्वरितं ययौ ५० रामः सारथिना सार्द्धं लक्ष्मणेन
समन्वितः मध्यकक्ष्यावसिष्ठादीन् पश्यन्नेव त्वरान्वितः ५१ पितुः समीपं सं
गम्य ननाम च ततः पितुः राममालिंगितुं राजा समुत्थाय ससंभ्रमः ५२ बाहू
प्रसार्य रामेति दुःखान्मध्ये पपात ह हाहेति रामस्तं शीघ्रमालिंग्यांके न्यवेश
यत् ५३ राजानं मूर्छितं दृष्ट्वा चुक्रुशुः सर्वयोषितः किमेतद्रोदनमिति वसि
ष्ठोपि समाविशत् ५४ रामः पप्रच्छ किमिदं राज्ञो दुःखस्य कारणं एवं पृच्छ
ति रामे सा कैकेयी राममब्रवीत् ५५ त्वमेव कारणं तत्र राज्ञो दुःखोपशांतये
किंचित्कार्यं त्वया राम कर्त्तव्यं नृपते र्हितं ५६ कुरु सत्यं प्रतिज्ञातं राजानं सत्य
वादिनं राज्ञा वरद्वयं दत्तं मम संतुष्टचेतसा ५७ त्वदधीनं तु तत्सर्वं वक्तुं लालज्ज

अयो॰स॰३ तेनृपः सत्यपाशेन संबद्धं पितुरं त्रातुमर्हसि ५८ पुत्रशब्देन चैतद्धि नरकात्त्रायते
१२ पिता रामस्तयोदितं श्रुत्वाश्रूलेनाभिहतो यथा ५९ व्यथितः केकयीं प्राह किं मामे
वं प्रभाषसे पित्रर्थे जीवितं दास्ये पिबेयं विषमुल्बणं ६० सीतां त्यक्ष्येथ कौश
ल्यां राज्यं चापि त्यजाम्यहं अनाज्ञप्तोपि कुरुते पितुः कार्यं स उत्तमः ६१ उक्तः
करोति यः पुत्रः स मध्यम उदाहृतः उक्तोपि कुरुते नैव स पुत्रो मल उच्यते ६२
अतः करोमि तत्सर्वं यन्मामाह पिता मम सत्यं सत्यं करोम्येव रामो द्विर्नाभि
भाषते ६३ इति रामप्रतिज्ञां सा श्रुत्वा वक्तुं प्रचक्रमे राम त्वदभिषेकार्थं सं
भाराः संभृताश्च ये ६४ तैरेव भरतो वश्यमभिषेच्यः प्रियो मम अपरेणव १२
रेणाभ्युचीरवासा जटाधरः ६५ वनं प्रयाहि शीघ्रं त्वमद्यैव पितुराज्ञया चतु

दृश्शसमास्तत्रवसन्मुन्यन्नभोजनः ६६ एतद्देवपितुस्तेद्यकार्यंत्वंकर्तुमर्हसि रा
ज्ञ ज्ञातुर्त्वंतिवक्तुंत्वामेवंरघुनंदन ६७ श्रीरामउवाच भरतस्यैवराज्यंस्याद
हंगच्छामिदंडकान् किंतुराजानवक्त्रीहमांनजानेत्रकारणं ६८ श्रुत्वैतद्रा
मवचनंदृष्ट्वारामंपुरःस्थितं प्राहराजादशरथोदुःखितोदुःखितंवचः ६९
स्त्रीजितंभ्रांतहृदयमुन्मार्गपरिवर्तिनं निगृह्यमांगृहाणेदंराज्यंपापंनतद्भ निबध्य
वेत् ७० एवंचेदनृतंनैवमांस्पृशेद्रघुनंदन इत्युक्त्वादुःखसंतप्तोविलला
पन्नृपस्तदा ७१ हारामहाजगन्नाथहारामप्राणवल्लभ मांविसृज्यकथं
घोरंविपिनंगंतुमर्हसि ७२ इतिरामंसमालिंग्यमुक्तकंठोरुरोदह विमृज्य
नयनेरामःपितुःसजलपाणिना ७३ आश्वासयामाससनृपंशनैःसनयको

अयो॰ स॰ ३ विदः किमत्र दुःखेन विभो राज्यं शास्तु मेनुजः ७४ अहं प्रतिज्ञां निस्तीर्य
पुनर्यास्यामि ते पुरं राज्यात्कोटिगुणं सौख्यं मम राजन्वने सतः ७५ त्वत्स
१२ त्यपालनं देवकार्यं चापि भविष्यति कैकेय्याश्च प्रियो राजन्वनवासो महागुणः श्री
७६ इदानीं गंतुमिच्छामि व्येतु मातुश्च हृज्ज्वरः संभाराश्चोपह्रियंताभिषे
कार्थमागताः ७७ मातरं च समाश्वास्य अनुनीय च जानकीं आगत्य पा
दौ वंदित्वा तव यास्ये सुखं वनं ७८ इत्युक्त्वा तु परिक्रम्य मातरं द्रष्टुमाययौ कौ
शल्यापि हरेः पूजां कुरुते रामकारणात् ७९ होमं च कारयामास ब्राह्मणेभ्यो द
दौ धनं ध्यायंती विष्णुमेकाग्रमनसा मौनमास्थिता ८० अंतस्थमेकं घन
चित्प्रकाशं निरस्तसर्वातिशयस्वरूपं विष्णुं सदानंदमयं हृद[illegible] संभावयंती न छो १२

दंडकारामं ८१ इतिश्रीमदध्यात्मरामायणेअयोध्याकांडेतृतीयसर्गः ३ ॥ ६॥
श्रीमहादेवउवाच ततःसुमित्रांदृष्ट्वानंरामंराज्ञींससंभ्रमा कौशल्यांबोधयामा
सरामोयंसमुपस्थितः १ श्रुत्वैवरामनामैषाबहिर्दृष्टिप्रवाहिनी रामंदृष्ट्वाकिरा सक्कसमाधिरिसर्थः।
ढास्त्रमालिंग्यांकेन्यवेशयत् २ मूर्ध्न्यवघ्रायपस्पर्शगात्रंनीलोत्पलछविं भुंक्ष्व
पुत्रेतिचप्राहमिष्टमन्नंक्षुधार्दितः ३ रामःप्राहनमेमानभोजनावसरःकृतः
दंडकागमनेशीघ्रंममकालोद्यनिश्चितः ४ कैकेयीवरदानेनसत्यसंधःपि
तामम भरतायददौराज्यंममाप्यारण्यमुत्तमं ५ चतुर्दशसमास्तत्रह्युषि
त्वामुनिवेषधृक् आगमिष्येपुनःशीघ्रंनचिंतांकर्तुमर्हसि ६ तच्छ्रुत्वासहसा
दुःखान्मूर्छितापुनरुत्थिता आहरामंसुदुःखार्त्तादुःखसागरसंप्लुता ७ यदि

अयो॰ स॰ ४ रामवनंसत्वंयासिचेन्नयमामपि त्वद्विहीनाक्षणर्द्धं वाञ्जीवितंधारयेकथं
८ यथागोर्वालकंवत्संत्यक्तानतिष्ठेन्नकुत्रचित् तथैवत्वांनरश्रेष्ठो मित्यक्तुं
१४ प्राणांस्त्रियंसुतं ९ भरतायप्रसन्नश्चेद्राज्यंराजाप्रयच्छतु किमर्थंवनवासा
यत्वामाज्ञापयतिप्रियं १० कैकेयावरदोराजासर्वस्वंवाप्रयच्छतु त्वयाकि
मपराद्धंहिकैकेय्यावान्नृपस्यवा ११ पितागुरुर्यथारामतवाहमधिकाततः
पित्राज्ञप्तोवनंगंतुंवारयेयमहंसुत १२ यदिगच्छसिमद्वाक्यमुल्लंघ्यनृप
वाक्यतः तदाप्राणान्परित्यज्यगच्छामियमसादनं १३ लक्ष्मणोपिततः
श्रुत्वाकौशल्यावचनंरुषा उवाचराघवंवीक्ष्यदहन्निवजगत्त्रयं १४ उ
न्मत्तंभ्रांतमनसंकैकेयीवशवर्तिनं बध्वानिहन्मिभरतंतद्बंधून्मातुलान

॥ यथा पिता गुरुस्तथाहमपि गुरुः। यक्षात नोधिका। पितुर्दशगुणं माता गौरवेणातिरिच्यते इति स्मृतेः॥

१४

१पुरा लोकान्प्रदहतः कालरुद्रस्येवेत्यर्थः

जानामि सत्यं त त्सर्वं २

पि १५ अद्यपश्यंतुमेशौर्यंलोकान्प्रदहतःपुरा रामत्वंअभिषेकायकुरुयत्नम

रिंदम १६ धनुःपाणिरहंतत्रनिहन्यांविघ्नकारिणः इतिब्रुवंतंसौमित्रिमा

लिंग्यरघुनंदनः १७ शूरोसिरघुशार्दूलममात्यंतहितेरतः जानामिसर्वंत

त्सत्यंकिंतुतेसमयोनहि १८ यदिदंदृश्यतेसर्वंराज्यंदेहादिकंचयत् यदिस

त्यंभवेत्तत्रआयासःसफलश्चते १९ भोगामेघवितानस्थविद्युल्लेखेवचंचलाः।

आयुरप्यग्निसंतप्तलोहस्थजलबिंदुवत् २० यथाव्यालगलस्थोपिभेकोदं

शानपेक्षते तथाकालाहिनाग्रस्तोलोकोभोगानशाश्वतान् २१ करोतिदुः

खेनहिकर्मतंत्रंशरीरभोगार्थमहर्निशंनरः देहस्तुभिन्नःपुरुषात्समीक्ष्यते

कोवात्रभोगःपुरुषेणभुज्यते २२ पितृमातृसुतभ्रातृदारबंध्वादिसंगमः

२ते सर्वं कालाग्निरुद्रतुल्यं त्वं सत्यं जानामि किंतु रुद्रनी म

समयो न किंतु चतुर्दशवर्षेमिति व्यंग्यम्॥

प्रपायामिवजंतूनां नद्यांकाकाष्ठौघवंचलः २३ छायेवलक्ष्मीश्चपला प्रतीतातारु
ण्यमंबूर्मिवद्ध्रुवंच स्वप्नोपमंस्त्रीसुखमायुरल्पं तथापिजंतोरभिमानएषः २४
संसृतिःस्वप्नवद्दृश्यासदारोगादिसंकुला गंधर्वनगरप्रख्यामूढस्तामनुवर्त्तते २५
आयुष्यंक्षीयतेयस्मादादित्यस्यगतागतैः दृष्ट्वान्येषांजरामृत्यूकथंचिन्नैवबुध्यते
२६ सएवदिवसःसैवरात्रिरित्येवमूढधीः भोगाननुपतत्येवकालवेगंनपश्यति
२७ प्रतिक्षणंक्षरत्येतदायुरामघटांबुवत् सपत्नाइवरोगौघाः शरीरंप्र
हरंत्यहो २८ जराव्याघ्रीवपुरतस्तर्जयंत्यवतिष्ठते मृत्युःसहैवयात्येषः
समयंसंप्रतीक्षते २९ देहेहंभावमापन्नोराजाहंलोकविश्रुतः इत्यस्मिन्म
नुतेजंतुःकृमिविड्भस्मसंज्ञिते ३० त्वगस्थिमांसविण्मूत्ररेतोरक्तादिसंयु १५
तः विकारीपरिणामीचदेहआत्माकथंवद ३१ यमास्थायभवाँल्लोकंद

सुमित्रतिलक्ष्मण देहाभिमानिनः सर्वेदोषाः प्रादुर्भवंतिहि ३२ देहोहमिति
याबुद्धिरविद्यासाप्रकीर्तिता नाहंदेहश्चिदात्मेतिबुद्धिर्विद्येतिभण्यते ३३ अ
विद्यासंसृतेर्हेतुर्विद्यातस्यानिवर्तिका तस्माद्यत्नः सदाकार्योविद्याभ्यासेमुमु
क्षुभिः कामक्रोधादयस्तत्रशत्रवःशत्रुसूदन ३४ तत्रापिक्रोधवालंमोक्षविघ्ना ए
यसर्वदा येनाविष्टःपुमान्हंतिपितृभ्रातृसुहृत्सखीन् ३५ क्रोधमूलोमनस्ता
पः क्रोधःसंसारबंधनं धर्मक्षयकरःक्रोधस्तस्मात्क्रोधंपरित्यज ३६ क्रोधएव
महान्शत्रुस्तृष्णावैतरणीनदी संतोषोनंदनवनंशांतिरेवहिकामधुक् ३७ त
स्मात्क्षांतिंभजस्वाद्यशत्रुरेवंभवेन्नते देहेंद्रियमनःप्राणबुद्ध्यादिभ्योविलक्षणः
३८ आत्माशुद्धःस्वयंज्योतिरविकारीनिराकृतिः यावद्देहेंद्रियप्राणैर्भिन्नत्वं

अयो॰ स॰ ४
१६

नात्मनोविदुः ३९ तावत्संसारदुःखौघैःपीड्यंतेमृत्युसंयुताः तस्मात्त्वंसर्वदाभिन्नमा
त्मानंहृदिभावय ४० बुद्ध्यादिभ्योबहिःसर्वमनुवर्त्तस्वमाखिदः भुंजन्प्रारब्धम
खिलंसुखंवादुःखमेववा ४१ प्रवाहपतितंकार्यंकुर्वन्नपिनलिप्यते बाह्येसर्वत्रक
र्तृत्वमावहन्नपिराघव ४२ अंतःशुद्धस्वभावस्त्वंलिप्यसेनचकर्मभिः एतन्मयो
दितंकृत्स्नंहृदिभावयसर्वदा ४३ संसारदुःखैरखिलैर्बाध्यसेनकदाचन त्वमप्येवं
मयादिष्टंहृदिभावयनित्यदा ४४ समागमंप्रतीक्षस्वनदुःखैःपीड्यसेचिरं नसदै
कत्रसंवासःकर्ममार्गानुवर्त्तिनां ४५ यथाप्रवाहपतितप्लवानांसरितांतथा चतु
र्दशसमासंख्याःक्षणार्धमिवजायते ४६ अनुमन्यस्वमामंबदुःखंसंत्यज्यदूरतः।
एवंचेत्सुखसंवासोभविष्यतिवनेमम ४७ इत्युक्त्वादंडवन्मातुःपादयोरपतच्चिरं। ३ तज्जन्यपुण्यपापाभ्यांनलिप्यते पृथग्जनोपि एवंतत्त्वतथाभावयतः सर्वथातत्त्वोपदेशः इति।

१६

उत्थाप्यांकेसमावेश्य आशीर्भिरभिनंदयत् ४८ सर्वेदेवाःसगंधर्वाब्रह्माविष्णुशिवा
दयः रक्षंतुत्वां सदायांतेनिषण्णंनिद्रयायुतं ४९ इतिप्रस्थापयामाससमालिंग्य
पुनःपुनः लक्ष्मणोपितदारामंनत्वाहर्षाश्रुगद्गदः ५० आहराममंमातस्थुःसं
श्रयोयंत्वयाहृतः यास्यामिपृष्ठतोरामसेवांकर्तुंतदादिश मा ५१ अनुगृह्णीष्वमांरा
मनोचेत्प्राणांस्त्यजाम्यहं तथेतिराघवोप्याहलक्ष्मणंप्राहिमांचिरं ५२ ततःसीतां
समाधातुंगतःसीतापतिर्विभुः आगतंपतिमालोक्यप्रदेवकिंसेनयाविना ५३ आगं
तोसिगतः कुत्रश्वेतछत्रंचतेकुतः वादित्राणिनवाद्यंतेकिरीटादिविवर्जितः
५४ सामंतराजसहितः संभ्रमान्नागतोसिकिं इतिस्मसीतयापृष्टोरामःसस्मित
मब्रवीत् ५५ राज्ञामेदंडकारण्यराज्यंदत्तंशुभेखिलं अतस्तत्पालनार्थायश्री
सीतासुस्मितभाषिणी॥ स्वर्णपात्रस्थसलिलैः पादौप्रक्षाल्यभक्तितः॥ पप्रच्छपतिमालोक्य ८

॥ ८ सेनया विना कुत्र गतः आगतोसी सत्यचयः

ग्रंयास्यामिभामिनि ५७ अद्यैवयास्यामिवनंत्वंतुश्वश्रुसमीपगा शुश्रूषांकुरुमेमा
तुर्नमिथ्यावादिनोवयं ५८ इतिब्रुवंतंश्रीरामंसीताभीताब्रवीद्वचः किमर्थंनचराज्ये

तेपित्रादत्तंमहात्मना ५९ तामाहरामःकैकेय्यैराज्ञाप्रीतोवरंददौ भरतायददौराज्यं
वनवासंममानघे ६० चतुर्दशसमास्तत्रवासोमेकिलयाचितः तयादेव्याददौरा
जासत्यवादीदयापरः ६१ अतःशीघ्रंगमिष्यामिमाविघ्नंकुरुभामिनि। श्रुत्वातद्राम
वचनंजानकीप्रीतिसंयुता ६२ अहमग्रेगमिष्यामिवनंपश्चात्त्वमेष्यसि इत्याह
मांविनागंतुंनवराघवनोचितं ६३ तामाहराघवःप्रीतःस्वप्रियांप्रियवादिनींकथं
वनंत्वांनेष्येहंबहुव्याघ्रमृगाकुलं ६४ राक्षसाघोररूपाश्चसंतिमानुषभोजनाः सिं 
हव्याघ्रवराहाश्चसंचरंतिसमंततः ६५ कटु·म्लफलमूलानिभोजनार्थेसुमध्य

प्रत्युवाच स्फुरद्वक्त्रा किंचित्कोपसमन्विता ॥ कथं मामिच्छसे त्यक्तुं धर्मपत्नीं पतिव्रतां ॥१॥

मे अपूपानि व्यंजनानि विद्यंते न कदाचन ६७ काले काले फलं वापि विद्यते कुत्र सुं
दरि मार्गो न दृश्यते ह्यपि शर्कराकंटकान्वितः ६८ पादचारेण गंतव्यं हीनवाता
तपादिमत् राक्षसादीन् वने दृष्ट्वा जीवितं हास्यसे चिरात् ६९ गुहागह्वरसंबाधं
झिल्लीदंशादिनियुतं एवं बहुविधं दोषं वनं दंडकसंज्ञितं ७० तस्माद्गृहे गृहे तिष्ठ
शीघ्रं द्रक्ष्यसि मां पुनः रामस्य वचनं श्रुत्वा सीता दुःखसमन्विता ७१ त्वदनन्या
म दोषां मां धर्मज्ञोसि दयापरः त्वत्समीपे स्थितां राम को वा मां धर्षयेद्वने ७२ फ भीषयेत्
लमूलादिकं पद्यं त्वभुक्तावशेषितं तदेवामृततुल्यं मे तेन तुष्टा वसाम्यहं ७३
त्वया सह चरंत्या मे कुशाः काशाश्च कंटकाः पुष्पास्तरणतुल्या मे भविष्यंति न सं
शयः ७४ अहं त्वां क्लेशयेनैव भवेयं कार्यसाधिनी बाल्ये मां वीक्ष्य कश्चिद्वै ज्यो

 तिःशास्त्रविशारदः ७५ प्राहतेविपिनेवासःपत्यासहभविष्यति सत्यवादीद्विजोत्र
 यागमिष्यामित्वयासह ७६ अन्यत्किंचित्प्रवक्ष्यामिश्रुत्वामांनयकाननं रामायणा
निबहुशःश्रुतानिबहुभिर्द्विजैः ७७ सीतांविनावनंरामोगतःकिंकुत्रचिद्वद अ
नस्त्वयागमिष्यामिसर्वथात्वत्सहायिनी ७८ यदिगच्छसिमांत्यक्त्वाप्राणांस्त्यक्ष्यामि
तेग्रतः इतितन्निश्चयंज्ञात्वासीतायारघुनंदनः ७९ अब्रवीद्देविगच्छत्वंवनंशीघ्रं
मयासह अरुंधत्यैप्रयच्छाशुहारानाभरणानिच. ८० ब्राह्मणेभ्योधनंसर्वंदत्वा
गच्छामहेवनं इत्युक्तालक्ष्मणेनाशुद्विजानाहूयभक्तितः ८१ ददौगवांवृंदश
तंधनानिवस्त्राणिदिव्यानिविभूषणानि कुटुंबवद्भ्यःश्रुतशीलवद्भ्योमुदाद्विजे
भ्योरघुवंशकेतुः ८२ अरुंधत्यैददौसीतामुख्यान्याभरणानिच रामोमातुःसे 

वकेभ्योददौधनमनेकधा ८३ स्वकांतःपुरवासिभ्यःसेवकेभ्यस्तथैवच पौरजानपदे
भ्यश्चब्राह्मणेभ्यःसहस्रशः ८४ लक्ष्मणोपिसुमित्रांतुकौशल्यायैसमर्पयन्
धनुःपाणिःसमागत्यरामस्याग्रेअवस्थितः ८५ रामःसीतालक्ष्मणश्चजग्मुःसर्वे
नृपालयं ८६ श्रीरामःसहसीतानृपानपथेगछन्शनैःपौरान्जानपदान्कुर्न् सलक्ष्मणे
हलदृशःसानंदमुद्वीक्षयन् रूपमःकामसहस्रसुंदरवपुःकोन्यादिशोभासय
नृपादन्यासपवित्रितारिवलजगत्मापालयंतत्पितुः ८७ इतिश्रीअयोध्या
कांडेचतुर्थःसर्गः ४ श्रीमहादेवउवाच॥ आयांतंनागराहृष्ट्वामार्गेरामंस
जानकिं लक्ष्मणेनसमंवीक्ष्यउचुःसर्वेपरस्परं १ कैकेयावरदानादिश्रुत्वादुः
खसमावृत्ताः बतराजादशरथःसत्यसंधंप्रियंसुतं २ स्त्रीहेतोरत्यजन्का

१ तत्स्य कृत्संतत्तोऽप आर्षः

अयो॰ स॰ ५ मीतस्य सैत्यवर्गौ कुतः कैकेयीवा कथं दुष्टा रामं सत्यं प्रियंकरं ३ विवास

१९ यामास कथं क्रूरकर्मा तिमूढधीः हे जनानात्र वस्तव्यं गच्छामोऽद्यैव काननं

४ यत्र रामः स नार्यश्च सानुजो गंनुमिच्छति पद्भ्यं नु जानकी सर्वे पादचारेण

गच्छंती ५ पुंभिः कदाचिद्दृष्टा वा जानकी लोकसुंदरी सापि पादेन गच्छंतीज

नसंघेषु नावृता ६ रामोऽपि पादचारेण गजाश्वादिविवर्जितः गच्छति द्रक्ष्य

थ विभुं सर्वलोकैकसुंदरं ७ राक्षसी कैकयी नाम्ना जाता सर्वविनाशिनी राम

स्यापि नवेदुःखं सीतायाः पादचारतः ८ बलवान्विधिरेवात्र पुंप्रयत्नो हि दुर्ब

लः इति दुःखाकुले वृंदे साधूनां मुनिपुंगवः ९ अब्रवीद्वामदेवोऽथ साधूनां

संघमध्यगः मानुशोचथ रामं वा सीतां वञ्चित नत्वतः १० एष रामः परो वि वा १९

ष्णुरादिनारायणः स्मृतः एषा साज्ञानकी लक्ष्मीर्योगमायेति विश्रुता ११ असौ
शेषस्त्वमन्वेति लक्ष्मणाख्यश्च सांप्रतं एषा मायागुणैर्युक्तस्तत्तदाकारवानिव १२
एष एव रजोयुक्तो ब्रह्माभूद्विश्वभावनः सत्वाविष्टस्तथा विष्णुस्त्रिजगत्प्रतिपाल
कः १३ एष रुद्रस्तामसोंते जगत्प्रलयकारणं एष मत्स्यः पुराभूत्वा भक्तं वैवस्वतं म
नुं १४ नाव्यारोप्य लयस्यांते पालयामास राघवः समुद्रमथने पूर्वं मंदरे सुतलं ग
ते १५ अधारयत्स्वपृष्ठेद्रिं कूर्मरूपी रघूत्तमः महीं रसातलं याता प्रलये सूकरो भ
वन् १६ तोलयामास दंष्ट्राग्रेणैनां क्षोणीं रघुनंदनः नारसिंहवपुः कृत्वा प्रल्हाद
वरदः पुरा १७ त्रिलोककंटकं रक्षःपाटयामास तन्नखैः पुत्रराज्यं हृतं दृष्ट्वा त्वदि
त्या याचितः पुरा १८ वामनत्वमुपागम्य याञ्चया चाहरत्तु नः दुष्टक्षत्रियभूभार

अयो॰ स॰ ५ निवृत्तो भार्गवो भवत् १९ स एव जगतां नाथ इदानीं राम तां गतः रावणादीनि रक्षां
२० सि कोटिशोनिहनिष्यति २० मानुषेणैव मरणं तस्य दिष्टं दुरात्मनः राज्ञा दशर
थेनापि तपसाराधितो हरिः २१ पुत्रत्वाकांक्षया विष्णोस्तदा पुत्रो भवद्धरिः स एव वि
ष्णुः श्रीरामो रावणादिवधाय हि २२ गंता ह्येव वनं रामो लक्ष्मणेन सहायवान् एषा
सीता हरेर्माया सृष्टिस्थित्यंतकारिणी २३ राजा वा केकयी वापि नात्र कारणमण्वपि।
पूर्वेद्युर्नारदः प्राह भूभारहरणाय च २४ रामोप्याह स्वयं साक्षात् श्वो गमिष्याम्यहं
वनं अतो रामं समुद्दिश्य चिंतां त्यज यथ बालिशाः २५ राम रामेति ये नित्यं जपंति मनु
जा भुवि तेषां मृत्युभयादीनि न भवंति कदाचन २६ किं पुनस्तस्य रामस्य दुःखशंका
महात्मनः राम नाम्नैव मुक्तिः स्यात् कलौ नान्येन केनचित् २७ मायामानुषरूपेण वि २०

द्रंबयति लोकस्कृतं भक्तानां भजनार्थाय एव लक्ष्मणस्य च धाप च २८ राज्ञश्चानीरसिध्यर्थं
मानुषं वपुराश्रितः इत्युक्त्वा विरराम अथ वामदेवो महामुनिः २९ श्रुत्वा तेपि द्विजाः स
र्वे रामं ज्ञात्वा हरिं विभुं जहुर्हृत्संशयग्रंथिं राममेवान्वचिंतयन् ३० यद्वृदं चिंतये
न्नित्यं रहस्यं राम सीतयोः तस्य रामे दृढा भक्तिर्वेद्विज्ञानपूर्वकं ३१ रहस्यं गोप
नीयं वो यूयं वै राघवप्रियाः इत्युक्त्वा प्रययौ विप्रस्तेपि रामं परं विदुः ३२ ततो रामः
समाविश्य पितृगेहमवारितः सानुजः सीतया गत्वा कैकेयीमिदमब्रवीत् ३३
आगता स्मो वयं मातस्त्रयस्ते संमतेवने गंतुं कृतधियः शीघ्रमाज्ञापयतु नः पिता
३४ इत्युक्ता सहसोत्थाय चीराणि प्रददौ स्वयं रामाय लक्ष्मणायाथ सीतायै च पृ
थक् पृथक् ३५ रामस्तु वस्त्राण्युत्सृज्य वन्यचीराणि पर्यधात् लक्ष्मणोपि तथा चक्रे

ने

ही

अयो॰स॰५ सीतातन्नविजानती ३६ हस्तेगृहीत्वारामस्यलज्जयामुखमीक्षत रामोगृहीत्वातच्चीरमं
२१ शुकेपर्यवेष्टयत् ३७ तदृष्ट्वारुरुदुःसर्वेराजदाराःसमंततः वसिष्ठस्तुतदाकर्ण्यरुदि
तंभर्त्सयन्नुषा ३८ कैकेयींप्राहदुर्वृत्तेरामएवत्वयावृतः वनवासायदुष्टेत्वंसीतायै
किंप्रयच्छसि ३९ यदिरामंसमन्वेतिसीताभक्त्यापतिव्रता दिव्यांबरधरानित्यंसर्वा
भरणभूषिता ४० रमयत्वनिशंरामंवनदुःखनिवारिणी राजादशरथोप्याहसुमं
त्रंरथमानय ४१ रथमारुह्यगच्छंत्वनुवनंवनचरप्रियाः इत्युक्त्वाराममालोक्यसी
तांचैवसलक्ष्मणं ४२ दुःखान्निपतितोभूमौरुरोदाश्रुपरिप्लुतः आरुरोहरथंसी
ताशीघ्रंरामस्यपश्यतः ४३ रामःप्रदक्षिणंकृत्वापितरंरथमारुहत् लक्ष्मणःख २१
ड्गयुगुलंधनुस्तूणीयुगंतथा ४४ गृहीत्वारथमारुह्यनोदयामाससारथिं तिष्ठति

ष्ठसुमंत्रेति राजा दशरथोऽब्रवीत् ४५ गच्छ गच्छेति रामेण नोदितो चोदयद्रथं रामे दूरं
गते राजा मूर्छितः प्रापतद्भुवि ४६ पौरास्तु बालवृद्धाश्च वृद्धा ब्राह्मणसत्तमाः ति
ष्ठ तिष्ठेति रामेति क्रोशन्तो रथमन्वयुः ४७ राजा रुदित्वा सुचिरं मां नयन्तु गृहं प्रति कौ
शल्याया राममातुरित्याह परिचारकान् ४८ किंचित्कालं भवेत्तत्र जीवनं दुःखितस्य
मे अतऊर्ध्वं न जीवामि चिरं रामविनाकृतः ४९ ततो गृहं प्रविष्टैव कौशल्यायाः पपा
तह मूर्छितश्च चिराद्बुध्वा तूष्णीमेवावतस्थिवान् ५० रामस्तु तमसातीरं गत्वात
त्रावसत्सुखी। जलं प्राश्य निराहारो वृक्षमूले स्वपद्विभुः ५१ सीतया सह धर्मात्मा
धनुःपाणिस्तु लक्ष्मणः पालयामास धर्मज्ञः सुमंत्रेण समन्वितः ५२ पौराः सर्वे
समागम्य स्थितास्तस्याविदूरतः शक्ता रामं पुरं नेतुं नो चेद्रक्ष्यामहे वनं ५३ इति

अयो॰ सर्ग ५ निश्चयमाज्ञाय तेषां रामोतिविस्मितः नाहंगच्छामि नगरमेते वै क्लेशभागिनः
५४ भविष्यंतीति निश्चित्य सुमंत्रमिदमब्रवीत् इदानीमेव गच्छामः सुमंत्र
२२ रथमानय ५५ इत्याज्ञप्तः सुमंत्रोपि रथं बाहेर योजयत् आरुह्य रामः सीता च
लक्ष्मणोपि प्रययुर्द्रुतं ५६ अयोध्याभिमुखं गत्वा किंचिद्दूरं ततो ययुः तेपि रा
मम दृष्ट्वैव प्रातरुत्थाय दुःखिताः ५७ रथनेमिगतं मार्गं पश्यंतस्ते पुरं ययुः हृदि रा
मं ससीतं ते ध्यायंतस्तस्थुरन्वहं ५८ सुमंत्रोपि रथं शीघ्रं नोदयामास सादरं ।
स्फीतान्जनपदान्पश्यन् रामः सीतासमन्वितः ५९ गंगातीरं समागच्छच्छृंगि गा
वेराविदूरतः गंगां दृष्ट्वा नमस्कृत्य स्नात्वा सानंदमानसः ६० शिंशपावृक्षमू
ले तु निषसाद रघूत्तमः ततो गुहो जनैः श्रुत्वा रामागमं महोत्सवं ६१ सखायं त्वा २२

मिनं द्रष्टुं हर्षात्तूर्णं समायतत् फलानि मधुपुष्पादि गृहीत्वा भक्तिसंयुतः ६२ राम
स्याग्रे विनिक्षिप्य दंडवत्प्रापतद्भुवि गुहमुत्थाप्य तं तूर्णं राघवः परिषस्वजे ६३
संपृष्टकुशलो रामं गुहः प्रांजलिरब्रवीत् धन्योहमद्य मे जन्म नैषादं लोकपावन ६४ मे ३
बभूव परमानंदः स्पृष्ट्वा तेंगं रघूत्तम नैषादराज्यमेतत्ते किंकरस्य रघूत्तम ६५ त्वद
धीनं वसन्नत्र पालयास्मान्रघूद्वह आगच्छ यामो नगरं पावनं कुरु मे गृहं ६६
गृहाण फलमूलानि त्वदर्थं संचितानि मे अनुगृह्णीष्व भगवन् दासस्तेहं सुरोत्तम
६७ रामस्तमाह सुप्रीतो वचनं शृणु मे सखे न वेक्ष्यामि गृहं ग्रामं वर्षाणि नव पंच
च ६८ दत्तमन्येन नो भुंजे फलमूलादि किंचन राज्यं ममैतत्ते सर्वं त्वं सखा मेति
वल्लभः ६९ वटक्षीरं समानाय्य जटामुकुटमादरात् बबंध लक्ष्मणेनाथ सहितो

अयो॰स॰५ रघुनंदनः ७० जलमात्रंतुसंप्राश्यसीतयासहराघवः आस्तृतंकुशपर्णाद्यैः श
२३ यनंलक्ष्मणेनहि ७१ उवासतत्रनगरेप्रासादाग्रेयथापुरा सुष्वापतत्रवैदेह्यापर्यं
कइवसंस्कृते ७२ ततोविदूरेपरिगृह्यचापंसबाणतूणीरधनुःसलक्ष्मणः रर
क्षरामंपरितोविपश्यन्गुहेनसार्धंसशरासनेन ७३ इतिश्रीमध्यात्मरामायणे
अयोध्याकांडेपंचमःसर्गः॥५॥ श्रीमहादेवउवाच सुप्तंरामंसमालोक्यगुहःसा
श्रुपरिप्लुतः लक्ष्मणंप्राहविनयाद्भ्रातःपश्यसिराघवं १ शयानंकुशपत्रौघसं
स्तरेसीतयासह यःशेतेस्वर्णपर्यंकेस्वास्तीर्णेभवनोत्तमे २ कैकेयीरामदुःख २३
स्यकारणंविधिनाहता मंथराबुद्धिमास्थायकैकेयीपापमाचरत् ३ तच्छ्रुत्वाल
क्ष्मणःप्राहसखेशृणुवचोमम कःकस्यहेतुर्दुःखस्यकश्चहेतुःसुखस्यवा ४

स्वपूर्वार्जितकर्मैव कारणं सुखदुःखयोः सुखस्य दुःखस्य न कोपि दाता परो ददाती
ति कुबुद्धिरेषा ५ अहं करोमीति वृथाभिमानः स्वकर्मसूत्रग्रथितो हि लोकः ६
सुहृन्मित्रार्युदासीनद्वेष्यमध्यस्थबांधवाः स्वयमेवाचरन्कर्म तथा तत्र विभाव्यते
७ सुखं वा यदि वा दुःखं स्वकर्मवशगो नरः यद्यद्यथागतं तत्तद्भुक्त्वा स्वस्थमना भ
वेत् ८ नेमे भोगागमे वांछा नमे भोगविवर्जने आगच्छत्वथ मा गच्छत्व भोगवशगो भ
वेत् ९ यस्मिन् देशे च काले च यस्माद्वा येन केन वा कृतं शुभाशुभं कर्म भोज्यं तत्तत्र
नान्यथा १० अलं हर्षविषादाभ्यां शुभाशुभफलोदये विधात्रा विहितं यद्यत्तद
लंघ्यं सुरासुरैः ११ सर्वदा सुखदुःखाभ्यां नरः प्रत्यवरुध्यते शरीरं पुण्यपापाभ्या
मुत्पन्नं सुखदुःखवत् १२ सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखं द्वयमेतद्धि

=२ सुहृदाद्यर्थः यथा सुहृत्वादिसाधकं कर्म आचरन् तथा तत्र सुखदुःखा
दिविषये पि विभाव्यते ज्ञायते इत्यर्थः।

अयो०स०६ जंतूनामलंघ्यं दिनरात्रिवत् १३ सुखमध्ये स्थितं दुःखं दुःखमध्ये स्थितं सुखं।
२५ द्वयमन्योन्यसंयुक्तं प्रोच्यते जलपंकवत् १४ तस्माद्धैर्येण विद्वांसइष्टानिष्टोप
पत्तिषु नहृष्यंति न मुह्यंति सर्वं मायेति भावनात् १५ गुहलक्ष्मणयोरेवं भाषतो
र्विमलं नभः बभूव रामः सलिलं स्पृष्ट्वा प्रातः समाहितः १६ उवाच शीघ्रं सुदृढां
नावमानय मे सखे श्रुत्वा रामस्य वचनं निषादाधिपतिर्गुहः १७ स्वयमेव दृढां
नावमानिनाय सुलक्षणां स्वामिन्नारुह्यतां नौका सीतया लक्ष्मणेन च १८
वाहयेज्ज्ञातिभिः सार्धमहमेव समाहितः तथेति राघवः सीतामारोप्य शुभलक्ष्मणं १९ गुहस्य हस्तावालंब्य स्वयं चारुहदच्युतः आयुधादीन् समारोप्य लक्ष्मणो ᳚रुरोह च २० गुहस्तां वाहयामास ज्ञातिभिः सहितः स्वयं गंगामध्ये २४
प्या

गत्वागंगांप्रार्थयामासजानकी २१ देविगंगेनमस्तुभ्यंनिवृत्तावनवासतः रामेण
सहिताहंत्वांलक्ष्मणेनचपूजये २२ सुरामांसोपहारैश्चनानाबलिभिरादृता इत्यु
क्त्वापरकूलंतेननौनैरुत्तीर्यजग्मतुः २३ गुहोपिराघवंप्राहगमिष्यामित्वयासह अ
स्वसहगमनविषयां नुज्ञांदेहिराजेंद्रनोचेत्प्राणांस्त्यजाम्यहं २४ श्रुत्वानैषादिवचनंश्रीरामस्तम नैषादिर्गुहः
थाब्रवीत् चतुर्दशसमाःस्थित्वादंडकेपुनरप्यहं २५ आयास्याम्युदितंसत्यंना
सत्यंरामभाषितं इत्युक्त्वालिंग्यतंभक्तंसमाश्वास्यपुनःपुनः २६ निवर्त्तयामा
सगुहंसोपिकृच्छ्राद्ययौगृहं तत्रमेध्यंमृगंहत्वापक्त्वाहुत्वाचतेत्रयः २७ भुक्त्वावृ
क्षदलेसुप्त्वासुखमासनतांनिशां ततोरामस्तुवैदेह्यालक्ष्मणेनसमन्वितः २८
भरद्वाजाश्रमपदंगत्वाबहिरुपस्थितः तत्रैकंबटुकंदृष्ट्वारामःप्राहहेबटो २९
च

अयो॰ स॰ ६ रामोदाश्ररथिः सीतालक्ष्मणाभ्यांसमन्वितः आस्तेबहिर्वनस्येतितछ्रुत्वामुनिसंनि
धौ ३० तछ्रुत्वासहसागत्वापादयोःपतितोमुनेः स्वामिन्रामःसमागत्यवनाद्बहिर
२५ वस्थितः ३१ सभार्यःसानुजःश्रीमान्नाहमांदेवसन्निभः भरद्वाजायमुनयेज्ञापये
स्वयथोचितं ३२ तछ्रुत्वासहसोत्थायभरद्वाजोमुनीश्वरः गृहीत्वार्घ्यंचपाद्यंचराम
सामिप्यमाययौ ३३ दृष्ट्वारामंयथान्यायंपूजयित्वासलक्ष्मणं आहमेपर्णशालां
भोरामराजीवलोचन ३४ आगछपादरजसापुनीहिरघुनंदन इत्युक्त्वोटजमा
या नीयसीतंसहराघवौ ३५ भक्त्यापुनःपूजयित्वाचकारातिथ्यमुत्तमं अद्याहंतपसः
पारंगतोस्मितवसंगमात् ३६ ज्ञातंरामतवोदंतंभूतंचागामिकंचयत् जानामि २५
त्वांपरात्मानंमाययाकार्यमानुषं ३७ यदर्थमवतीर्णोसिप्रार्थितोब्रह्मणापुरा य

दर्थं वनवासस्येयत्करिष्यसि वै पुनः ३८ जानामि ज्ञानदृष्ट्याहं ज्ञानयात्वदुपासना
त् इतः परं त्वां किं वक्ष्ये कृतार्थोहिं रघूत्तम ३९ यत्त्वां पश्यामि काकुत्स्थ पुरुषं प्रकृतेः
परं रामस्त्वमभिवाद्याह सीतालक्ष्मणसंयुतः ४० अनुग्राह्यास्त्वया ब्रह्मन्वयं त्व
त्परिवांधवाः इति संभाष्य तेन्योन्यमुषित्वा मुनिसन्निधौ ४१ प्रातरुत्थाय यमुनामु
त्तीर्य मुनिदारकैः कृतप्लवेन मुनिना दृष्टमार्गेण राघवः ४२ प्रययौ चित्रकूटाद्रिं वा
ल्मीकेर्यत्र चाश्रमः गत्वा रामोथ वाल्मीकेराश्रमं ऋषिसंकुलं ४३ नानामृगद्विजाकी
र्णं नित्यपुष्पफलाकुलं तत्र दृष्ट्वा समासीनं वाल्मीकिं मुनिसत्तमं ४४ ननाम शिरसा
रामो लक्ष्मणेन च सीतया दृष्ट्वा रामं रमानाथं वाल्मीकिर्लोकसुंदरं ४५ जानकीलक्ष्म
णोपेतं जटामुकुटमंडितं कंदर्पसदृशाकारं कमनीयांबुजेक्षणं ४६ दृष्ट्वैव सहसो

५५ यमुनायां कृतप्लवेन कृतस्नानेन मुनिना दृष्टमार्गेण दर्शितमार्गेण राघवः मार्गस्थैर्वैसैर्मुनि द्त्तैः सह यमुनामुत्तीर्य इत्यर्थः॥

०२३ इदं मधुरमिदं भुंक्ष्वेत्येवं प्रीत्याबोधितः

अयो॰स॰६ तस्थौविस्मयानिमिषेक्षणः आलिंग्यपरमानंदं रामं हर्षाश्रुलोचनः ४७ पूज
यित्वाजगत्पूज्यं भक्त्यार्घ्यादिभिरादृतः फलमूलैः सुमधुरैर्भोजयित्वाचलालितः
२६ ४८ राघवः प्रांजलिः प्राहवाल्मीकिंविनयान्वितः पितुराज्ञांपुरस्कृत्यदंडकानाग
सर्वथाजानं सेवेसर्थ कमिदमसंदिग्धवचनं तावयं ४९ भवंतोयदिजानंतिकिंवक्ष्यामोत्रकारणं यत्रमेसुखवासायभवेत्स्था
नंवदस्वतत् ५० सीतयासहितः कालंकंचित्तत्रनयाम्यहं इत्युक्तोराघवेणसोमुनिः
सस्मितमब्रवीत् ५१ त्वमेवसर्वलोकानांनिवासस्थानमुत्तमं तवापिसर्वभूतानिनि
वाससदनानिहि ५२ एवंसाधारणंस्थानमुक्तंतेरघुनंदन सीतयासहितस्येतिविशे
षंपृछतस्तव ५३ तद्वक्ष्यामिरघुश्रेष्ठयत्तेनियतमंदिरं शांतानांसमदृष्टीनामद्वे २६
ष्टृणांचजंतुषु ५४ तामेवभजतांनित्यंहृदयंतेधिमंदिरं ५५ धर्माधर्मान्परित्यज्य

नस्तुमितिशेषः

त्वामेवभजतेनित्यं सीतयासहहेरामतस्यहृत्सुखमंदिरं ५५ त्वन्मंत्रजापकोयस्तुत्वामे
वशरणंगतः निर्द्वंद्वोनिस्पृहस्तस्यहृदयंतेसुमंदिरं ५६ निरहंकारिणः शांतायेरागद्वे
षवर्जिताः समलोष्टाश्मकनकास्तेषांतेहृदयंगृहं ५७ त्वयिदत्तमनोबुद्धिर्यः संतुष्टः
सदाभवेत् त्वयिसंत्यक्तकर्मायस्तन्मनस्तेशुभंगृहं ५८ योनद्वेष्ट्यप्रियंप्राप्यप्रियंप्रा
प्यनहृष्यति सर्वंमायेतिनिश्चित्यत्वांभजेत्तन्मनोगृहं ५९ षड्भावादिविकारान्योदेहे
पश्यतिनात्मनि ६० क्षुत्तृट्सुखंभयंदुःखंप्राणबुद्ध्योर्निरीक्ष्यते ६१ संसारधर्मैर्नि
र्मुक्तस्तस्यतेमानसंगृहं पश्यंतियेसर्वगुहाशयस्थंत्वांचिद्घनंसत्यमनंतमेकं अलेपकं आद्यमितिपाठांतरं
सर्वगतंवरेण्यंतेषांहृदब्जेसहसीतयावस ६३ निरंतराभ्यासदृढीकृतात्मनांत्वत्पा
दसेवापरिनिष्ठितानां त्वन्नामकीर्त्याहतकल्मषाणांसीतासमेतस्यगृहंहृदब्जे ६४

जन्ममात्रेण द्विजत्वं

अयो॰स॰ ६ रामत्वन्नाममहिमावर्ण्यतेकेनवाकथं यत्प्रभावादहंरामब्रह्मर्षित्वमवाप्तवान् ६५
अहंपुराकिरातेषुकिरातैःसहवर्द्धितः जन्ममात्रद्विजत्वंमेशूद्राचाररतःसदा ६५ शू
२९ द्रायांबहवःपुत्राउत्पन्नामेऽजितात्मनः ततश्चौरैश्चसंगम्यचौरोहमभवंपुरा ६६
धनुर्बाणधरोनित्यंजीवानामंतकोपमः एकदामुनयःसप्त दृष्टामहतिकानने ६७
साक्षान्मयाप्रकाशंतोज्वलनार्कसमप्रभाः तानन्वधावंलोभेनतेषांसर्वपरिच्छदा
न् ६८ गृहीतुकामस्तत्राहंतिष्ठतिष्ठेतिचाब्रुवं दृष्ट्वामांमुनयोपृच्छन्किमापासिद्वि
जाधम ६९ अहंतानब्रुवंकिंचिदादातुंमुनिसत्तमाः पुत्रदारादयःसंतिबहवोमे
बुभुक्षिताः ७० तेषांसंरक्षणार्थायचरामिगिरिकानने ततोमामूचुरव्यग्राः
पृच्छगत्वाकुटुंबकं ७१ योयोमयाप्रतिदिनंक्रियतेपापसंचयः यूयंतद्भागिनः २९

पापलब्धधनादि
भोगभाजः नतुन
रकादिभाजइत्यर्थः।

किंवानेतिवेत्तिपृथक्पृथक् ७२ वयंस्यास्यामहेनावदागमिष्यसिनिश्चयः न
थेत्युक्त्वागृहंगत्वामुनिर्भिर्यदुदीरितं ७३ अपृच्छंपुत्रदारादीन् नैरुक्तोहंरघू
त्तम पापंत्वैवनत्सर्वेवयंनुफलभागिनः ७४ तच्छ्रुत्वाजातनिर्वेदोविचार्य
पुनरागमं मुनयोयत्रतिष्ठंतिकरुणापूर्णमानसाः ७५ मुनीनांदर्शनादेव
शुद्धांतःकरणोभवं धनुरादीन्परित्यज्यदंडवत्पतितोस्म्यहं ७६ रक्षध्वं
मांमुनिश्रेष्ठागच्छंतंनिरयार्णवं इत्यग्रेपतितंदृष्ट्वामामूचुर्मुनिसत्तमाः
७७ उत्तिष्ठोत्तिष्ठभद्रंतेसफलःसत्समागमः उपदेक्ष्यामहेतुभ्यंकिंचित्ते
नैवमोक्ष्यसे परस्परंसमालोच्यदुर्वृत्तोयंद्विजाधमः ७८ उपेक्ष्यएवस
द्भिस्तथापिशरणंगतः रक्षणीयःप्रयत्नेनमोक्षमार्गोपदेशतः ७९ इत्यु

अयो॰ स॰ ६ त्का राम ते नाम मव्यत्यस्ताक्षररूपकं एकाग्रमनसात्रैव मरेति जप सर्वदा ८०
आगच्छामः पुनर्यावत्तावदुक्तं सदा जप इत्युक्त्वा प्रययुः सर्वे मुनयो दिव्यदर्श
२८ नाः ८१ अहं यथोपदिष्टं तैस्तथाकरवमंजसा जपन्नेकाग्रमनसा बाह्यं वि
स्मृतवानहं ८२ एवं बहुतिथे काले गते निश्चलरूपिणः सर्वसंगविहीनस्य
वल्मीकोभून्ममोपरि ८३ ततो युगसहस्रांते ऋषयः पुनरागमन् मामूचु
र्निष्क्रमस्वेति तच्छ्रुत्वा तूर्णमुत्थितः ८४ वल्मीकान्निर्गतश्चाहं नीहारादिव
भास्करः मामप्याहुर्मुनिगणा वाल्मीकिस्त्वं मुनीश्वर ८५ वल्मीकात्संभवो
यस्माद्द्वितीयं जन्म तेऽभवत् इत्युक्त्वा ते ययुर्दिव्यगतिं रघुकुलोत्तम ८६ अ २८
हं ते राम नाम्नश्च प्रभावादीदृशोऽभवं अद्य साक्षात्प्रपश्यामि ससीतं लक्ष्मणे

२ यस्मात्ते इदानीं वल्मीकात्संभवः अत इदं ते जन्म द्वितीयं वल्मीकादभवदित्यर्थः।

=२ अयंवाल्मीकिर्मुनिःप्रचेतोवंशजरामायणकर्तृवाल्मीकेरन्यएवेतिबहवः। इतिएतट्टीकायांभागोजिभट्टैरुक्तं। तत्कुतइतिचिंत्यं।

=३ पर्वतगंगयोर्मध्येस्थलंदर्शयामासेतिशेषः।

नच ८७ एमिंराजीवपत्राक्षंत्वांमुक्त्वोनात्रसंशयः आगच्छराम भद्रंतेस्थलंवै
दर्शयाम्यहं ८८ एवमुक्त्वामुनिःश्रीमान्लक्ष्मणेनसमन्वितः शिष्यैःपरि
तोगत्वामध्येपर्वतगंगयोः ८९ तत्रशालांसुविस्तीर्णांकारयामाससर्वासभूः
प्राकूपश्चिमंदक्षिणोदकूशोभनंमंदिरद्वयं ९० जानक्यासहितोरामोलक्ष्म
त्रते णेनसमन्वितः तद्दिवसदृशाह्यवसन्भवनेत्तमेत ९१ वाल्मीकिनातत्र
जि सुपूजितोयंरामःससीतः सहलक्ष्मणेन दैवैर्मुनींद्रैःसहितोमुदास्तेस्वर्गेयथा
देवपतिःसशच्या ९२ इतिश्रीमध्यात्मरामायणेअयोध्याकांडेउमामहेश्व
रसंवादेषष्ठःसर्गः ६ श्रीमहादेवउवाच सुमंत्रोपितथायोध्यांदिनांतेप्रवि
वेशह वस्त्रेणमुखमाच्छाद्यबाष्पाकुलितलोचनः १ बहिरेवरथंस्थाप्य

=४ सप्रसिद्धोदेवपतिः शच्यादेवैश्चसहितोयथास्वर्गेआस्तेतथाससीतोमुनींद्रैःसहितोरामस्तत्रास्तेइत्यर्थः।

=३ तत्रऋषिर्दर्शितस्थले लक्ष्मणेनसमन्वितोवासभूः सर्वजगद्वासस्थानमपिरामः शालांमंदिरद्वयंचकारयामासतत्सर्वंतद्वासिभिर्भिल्लैरिति शेषः

अयो॰ ७ ज्ञानेंद्रष्टुमाययौ जयशब्देन राजानं स्तुत्वातंप्रणनामह २ ततोराजानमंतंतंसुमंत्रं
२९ विव्हलोब्रवीत् सुमंत्ररामःकुत्रास्तेसीतयालक्ष्मणेनच ३ कुत्रत्यक्तस्त्वयारामःकिंमो
पापिनमब्रवीत् सीतावालक्ष्मणोवापिनिर्दयंमांकिमब्रवीत् ४ हा राम हा गुणनिधे
हासीत्तेप्रियवादिनि दुःखार्णवेनिमग्नंमांम्रियमाणंनपश्यसि ५ विलप्यैवंचिरंराजानि
मग्नोदुःखसागरे एवंमंत्रीरुदंतंतंप्रांजलिर्वाक्यमब्रवीत् ६ रामःसीताचसौमित्रि=
मेयानीतारथेनते श्रृंगवेरपुरात्पार्श्वेगंगाकूलेव्यवस्थिताः ७ गुहेनकिंचिद्दानीतव्यं दानीतं
फलमूलादिकंचयत् स्पृष्ट्वाहस्तेनसंप्रीत्यानाग्रहीद्विससर्जतत् ८ वटक्षीरंसमाना
य्यगुहेनरघुनंदनः जटामुकुटमाबध्यमामाहरघुनंदनः ९ सुमंत्रब्रूहिराजानंशो २९
कस्तेकृतनमत्कृते साकेतादधिकंसौख्यंविपिनेनोभविष्यति १० मातुर्मेवंदनंब्रूहि

शोकंत्यजतनुमत्कृते आश्वासयतुराजानंवृद्धंशोकपरिप्लुतं ११ सीताचाश्रुपरीताक्षी
मामाहनृपसत्तम दुःखगद्गदयावाचारामंकिंचिदवेक्षती १२ साष्टांगप्रणिपातेनमेब्रू
हिश्वश्र्वोःपदांबुजे इतिप्ररुदतीसीतागताकिंचिदवाङ्मुखी १३ ततस्तेश्रुपरीताक्षा
नावमारुरुहुस्तदा यावद्गंगांसमुत्तीर्य गंस्तावदहंस्थितः १४ ततोदुःखेनमहतापु
नरेवाहमागतः ततोरुदंतीकौशल्याराजानमिदमब्रवीत् १५ कैकेय्यैप्रियभार्यायै
प्रसन्नोदत्तवान्वरं त्वंराज्यंदेहितस्यैवमत्पुत्रःकिंविवासितः १६ कृत्वात्वमेवतत्स
र्वमिदानींकिंनुरोदिषि कौशल्यावचनंश्रुत्वाक्षतेस्पृष्टइवाग्निना १७ पुनःशोका
श्रुपूर्णाक्षोकौशल्यामिदमब्रवीत् दुःखेनम्रियमाणंमांतंपुनर्दुःखयस्यलं १८
इदानीमेवप्राणाउत्क्रमिष्यंतिनिश्चयः शप्तोहंबाल्यभावेनकेनचिन्मुनिनापुरा
मे
१९

अयो० ७ पुराहंयौवनेदृप्तश्चापबाणधरोनिशि अचरंमृगयासक्तोनद्यास्तीरेमहावने त
३० त्रार्धरात्रसमयेमुनिःकश्चित्तृषार्दितः २० पिपासार्दितयोःपित्रोर्जलमानेतुमु
द्यतः अपूरयज्जलैःकुंभंतदाशब्दोभवन्महान् २१ गजःपिबतिपानीयमितिम
त्वामहानिशि बाणंधनुषिसंधायशब्दवेधिनमक्षिपं २२ हाहतोस्मीतितत्राभूच्छ
ब्दोमानुषसूचकः कस्यापिनकृतोदोषोमयाकेनहतोविधे २३ प्रतीक्षेतेमांमाता
चपिताचजलकांक्षया तच्छ्रुत्वाभयसंत्रस्तस्ततोहंपौरुषंवचः २४ शनैर्गत्वाथत
त्पार्श्वेत्वमिन्दशरथोस्म्यहं अजानतामयाविद्धक्षन्तुमर्हसिमांमुने २५ इत्यु
क्त्वापादयोस्तस्यपतितोगद्गदाक्षरः तदामामाहसमुनिर्मानैषीर्नृपसत्तम २६ ३०
ब्रह्महत्यास्पृशेत्त्वांवैश्योहंतपसिस्थितः पितरौमांप्रतीक्षेतेक्षुत्तृष्णापरिपीडि

तौ २७ नयोस्त्वमुदकं देहि शीघ्रमेवाविचारयन् नो चेत्त्वां भस्मसात्कुर्यात्पिता मे यदि कु
प्यति २८ जलं दत्त्वाथ तौ नत्वा कृतं सर्वं निवेदय शल्यमुद्धर मे देहात्प्राणांस्त्यक्ष्या
मि पीडितः २९ इत्युक्तो मुनिना शीघ्रं बाणमुत्पाट्य देहतः सजलं कलशं धृत्वा ग
तोहं यत्र दंपती ३० अतिवृद्धावंधदृशौ क्षुत्पिपासार्दितौ निशि नायाति सलिलं गृह्य
पुत्रः किंवात्र कारणं ३१ अनन्यगतिकौ वृद्धौ शोचौ क्षुत्तृट्परिपीडितौ आवामुपेक्षते
किंवा भक्तिमानावयोस्सुतः ३२ इति चिंताव्याकुलौ तौ मत्पादन्यासजं ध्वनिं श्रुत्वा
प्राह पिता पुत्र किं विलंबः कृतस्त्वया ३३ देह्यावयोः सुपानीयं पिब त्वमपि पुत्रक
इत्येवं लपतोर्भीत्या सकाशमगमं शनैः ३४ पादयोः प्रणिपत्याहमब्रुवं विनयान्वि
तः नाहं पुत्रस्त्वयोध्याया राजा दशरथोस्म्यहं ३५ पापोहं मृगयासक्तो रात्रौ मृगवि

हं
अयो॰स॰७ हिंसकः जलावतारादूरौस्थिताजलगतं ध्वनिं ३६ श्रुत्वाहंशब्दवेधित्वादेकंबाणमथा
३१ त्यजं हतोस्मीतिध्वनिंश्रुत्वा भयात्तत्राहमागतः ३७ जटाविकीर्यपतितंदृष्ट्वाहंमु
रश निदारकं भीतोगृहीत्वातत्पादौरक्षेत्यब्रवं ३८ मांनैषीरितिमांप्राहब्रह्मह
त्याभयंनते मत्पित्रोः सलिलंदत्वानिःप्रार्थ्यपुनर्जीवितं ३९ इत्युक्तोमुनिनानेन
ह्यागतोमुनिर्हिंसकः रक्षतंमांदयायुक्तौयुवांहिशरणागतं ४० इतिश्रुत्वाथदुः
खार्तौविलप्यबहुशोच्युतं पतितौनौसुतौयत्रनयतत्राविलंबयन् ४१ ततोनी
तौसुतोयत्रमयातौवृद्धदंपती स्पृष्ट्वासुतंतौहस्ताभ्यांबहुशोथविलेपतुः ४२
हाहेतिक्रंदमानौतौपुत्रपुत्रेत्यवोचतां जलंदेहीतिपुत्रेतिकिमर्थंनददास्यलं सिंह
४३ ततोमामूचतुः शीघ्रंचितिंरचयभूपते मयातदैवरचिताचितिस्तत्रनिवे ३१
शिताः त्रयस्तत्राग्निरुत्सृष्टोदग्धास्तेत्रिदिवंययुः ४४ तत्रवृद्धःपिताप्राह

त्वमप्येवंभविष्यसि पुत्रशोकेनमरणंप्राप्स्यसेवचनान्मम ४५ सइदानींम
मप्राप्तः शापकालोनिवारितः इत्युक्त्वाविललापाथराजाशोकसमाकुलः ४६
हाराम पुत्र हासीतेहालक्ष्मणगुणाकर त्वद्वियोगादहंप्राप्तोमृत्युंकैकेयीसं
भवं ४७ वदन्नेवंदशरथः प्राणांस्त्यक्त्वादिवंगतः कौशल्याचसुमित्राचतथान्या
राजयोषितः ४८ चुक्रुशुश्चविलेपुश्चउरस्ताडनपूर्वकं वसिष्ठः प्रययौतत्रप्रा
तर्मंत्रिभिरावृतः ४९ तैलद्रोण्यांदशरथंक्षिप्त्वादूतानथाब्रवीत् गच्छतत्वरितं
साश्वायुधाजिन्नगरंप्रति ५० तत्रास्तेभरतःश्रीमान्शत्रुघ्नसहितःप्रभुः उच्य
तांभरतःशीघ्रमागच्छेतिममाज्ञया ५१ अयोध्यांप्रतिराजानंकैकेयींचापिप
श्यतु इत्युक्तास्त्वरितंदूतागत्वाभरतमातुलं ५२ युधाजितंप्रणम्योचुर्भर

तंसानुजंप्रति वसिष्ठस्त्वांब्रवीद्राजन्भरतःसानुजःप्रभुः ५३ शीघ्रमागच्छतुपुरीमयो
ध्यामविचारयन् इत्याज्ञप्तोथभरतस्त्वरितंभयविह्वलः ५४ आययौगुरुणादिष्टः
सहदूतैस्तुसानुजः राज्ञोवाराघवस्यापिदुःखंकिंचिदुपस्थितं ५५ इतिचिंतापरोमा
र्गेचिंतयन्नगरंययौ नगरंभ्रष्टलक्ष्मीकंजनसंबाधवर्जितं ५६ उत्सवैश्चपरित्य
क्तंदृष्ट्वाचिंतापरोभवत् प्रविश्यराजभवनंराजलक्ष्मीविवर्जितं ५७ अपश्यत्कैके
यींतत्रएकामेवासनेस्थितां ननामशिरसापादौमातुर्भक्तिसमन्वितः ५८ आग
तंभरतंदृष्ट्वाकैकेयीप्रेमसंभ्रमात् उत्थायालिंग्यपरमसात्स्वांकमारोप्यसंस्थिता ५९
मूर्ध्न्यवघ्रायपप्रच्छकुशलंस्वकुलस्यसा पितांकुशलीभ्राता मातावाशुभलक्ष
णा ६० दिष्ट्यात्वमद्यकुशलीमयादृष्टोसिपुत्रक इतिपृष्टःसभरतोमात्राचिंता 

कुलेंद्रियः ६१ दूयमानेनमनसामातरंसमपृछत मातःपितामेकुत्रास्तेएकात्व
मिहसंस्थिता ६२ त्वयाविनानमेतातःकदाचिद्गृहसिस्थितः इदानींहइपतेने
वकुत्रतिष्ठतिमेवद ६३ अहष्ठापितरंमेद्यनयंदुःखंचजायते अथाहकेकयी
पुत्रंकिंदुःखेनतवानघ ६४ यागतिर्धर्मशीलानामश्वमेधादियाजिनां तांगतिंग
तवानद्यपितातेपितृवत्सल तछ्रुत्वानिपपातोर्व्यांभरतःशोकविह्वलः हाता
तक्वगतोसित्वंत्यक्त्वामांवृजिनार्णवे ६६ असमर्प्यैवरामायराज्ञेमांक्वगतोसिभोः
इतिविह्वलितंपुत्रंपतितंमुक्तमूर्धजं ६७ उत्थाप्यामृज्यनयनेकैकेयीपुत्रमब्रवी
त् समाश्वसिहिनंद्रंतेसर्वंसंपादितंमया ६८ नामाहभरतस्तातोम्रियमाणःकि
मब्रवीत् नमाहकेकयीदेवीभरतंभयवर्जिता ६९ हारामरामसीतेतिलक्ष्मणेति

अयो· ७ पुनःपुनः विलपन्नेवसुचिरंदेहंत्यक्त्वादिवंययौ ७० तामाहभरतोहंवरामःस
न्निहितोनकिं तदानींलक्ष्मणोवापिसीतावाकुत्रतेगताः ७१ कैकेयीउवाच रामस्य
२२ यौवराज्यार्थंपित्रातेसंभ्रमःकृतः तवराज्यप्रदानायतदाहंविघ्नमाचरं ७२ राज्ञा
न दत्तंहिमेपूर्वंवरदेवरद्वयं याचितंतदिदानींमेतयोरेकेनतेखिलं ७३ राज्यंराम
स्यचैकेनवनवासोमुनिव्रतं ततःसत्यपरोराजाराज्यंदत्त्वातेवैवहि ७४ रामंसंप्रे
षयामासवनमेवपितातव सीताप्यनुगतारामंपातिव्रत्यमुपाश्रिता ७५ सौभ्रात्रं
दर्शयन्राममनुयातोपिलक्ष्मणः वनंगतेषुसर्वेषुराजातानेवचिंतयन् ७६
प्रलपन्रामरामेतिममारनृपसत्तमः इतिमातुर्वचःश्रुत्वावज्राहतइवद्रुमः २२
७७ पपातभूमौनिःसंज्ञस्तंदृष्ट्वादुःखितातदा कैकेयीपुनरप्याहवत्सशोकेनकिं

नव ७८ राज्येमइतिसंप्राप्तेदुःखस्यावसरः कुतः इतिब्रुवंतीमालोक्यमातरंप्रदह
न्निव ७९ असंभाष्यासिपापेमेघोरेत्वंभर्तृघातिनी ७९ पापेत्वद्गर्भजातो
हंपापवानस्मिसांप्रतं अहमग्निंप्रवेक्ष्यामिविषंवाभक्षयाम्यहं ८० खड्गेन
वाथवात्मानंहत्वायामियमक्षयं भर्तृघातिनिदुष्टेत्वंकुंभीपाकंगमिष्यसि ८१
इतिनिर्भर्त्स्यकैकेयींकौसल्याभवनंययौ सापितंभरतंदृष्ट्वामुक्तकंठारुरोदह
८२ पादयोःपतितस्तस्याभरतोपितदारुदन् आलिंग्यभरतंसाध्वीराम
मातायशस्विनी ८३ कृशातिदीनवदनासाश्रुनेत्रेदमब्रवीत् पुत्रत्वयिगतेदूरेएवं
सर्वमभूदिदं उक्तंमात्राश्रुतंसर्वंत्वयातेमातृचेष्टितं ८४ पुत्रःसभार्योवनमेवया
तःसलक्ष्मणोमेरघुरामचंद्रः चिरांबरोबद्धजटाकलापःसंत्यज्यमांदुःखसमुद्र

अयो॰७ मग्नां ८५ हा राम हा मे रघुवंशनाथ जातोसि मे त्वं परतः परात्मा तथापि दुःखं न जहा
ति मां वै विधिर्बलीयानिति मे मनीषा ८६ स एवं भरतो वीक्ष्य विलपंतीं नृशंसां शुचा
३४ पादौ गृहीत्वा प्राहेदं शृणु मातर्वचो मम ८७ कैकेय्या यत्कृतं कर्म रामराज्याभिषेच
ने अन्यद्वा यदि जानामि सा मया नोदिता यदि ८८ पापं मेस्तु तदा मातर्ब्रह्महत्याशतो
द्भवं हत्वा वसिष्ठं खड्गेन अरुंधत्या समन्वितं ८९ भूयात्तत्पापमखिलं मम जानामि
यद्यहं इत्येवं शपथं कृत्वा रुरोद भरतस्तदा ९० कौसल्या तमथालिंग्य पुत्र जानामि
मा शुचः एतस्मिन्नंतरे श्रुत्वा भरतस्य समागमं ९१ वसिष्ठो मंत्रिभिः सार्धं प्रययौ रा
जमंदिरं रुदंतं भरतं दृष्ट्वा वसिष्ठः प्राह सादरं ९२ वृद्धो राजा दशरथो ज्ञानी सत्य ३४
पराक्रमः भुक्त्वा मर्त्यसुखं सर्वमिष्ट्वा विपुलदक्षिणैः ९३ अश्वमेधादिभिर्य

शैर्लब्धारामंसुतंहरिं अंतेजगामत्रिदिवंदेवेंद्रार्धासनंप्रभुः ९४ तंशोचसिरथे
वत्वमशोच्यंमोक्षभाजनं आत्मानित्योव्ययःशुद्धोजन्मनाशादिवर्जितः ९५
शरीरंजडमत्यर्थमपवित्रंविनश्वरं विचार्यमाणेशोकस्यनावकाशःकथंचन ९६
पितावातनयोवापियदिमृत्युवशंगतः मूढास्तमनुशोचंतिस्वात्मताडनपूर्वकं
९७ निःसारेखलुसंसारेवियोगोज्ञानिनांयदा भवेद्वैराग्यहेतुःसशांतिसौख्यंतनो
तिच ९८ जन्मवान्यदिलोकेस्मिंस्तर्हितंमृत्युरन्वगात् तस्मादपरिहार्योयंमृत्यु
र्जन्मवतांसदा ९९ स्वकर्मवशतःसर्वजंतूनांप्रभवाप्ययौ विजानन्नप्यविद्वान्यः
कथंशोचतिबांधवान् १०० ब्रह्मांडकोटयोनष्टाःसृष्टयोबहुशोगताः शुष्यंति
सागराःसर्वे कावास्थाक्षणजीविते १ चलपद्मांतलग्नांबुबिंदुवत्क्षणभंगुरं॥

= पृः अविद्वानपि कथंशोचतिबांधवान् किंपुनः विजानन्नात्मज्ञानीतिभावः

अयो॰ ७ आयुस्सजत्यवेलायांकस्तत्रप्रत्ययस्तव १०२ देहीप्राक्तनदेहोत्थकर्मणादेहवा
न्पुनः तद्देहोत्थेनचपुनरेवंदेहःसदात्मनः ३ यथात्यजतिवैजीर्णंवासोगृण्हा
३५ तिनूतनं तथाजीर्णंपरित्यज्यदेहीदेहं पुनर्नवं ४ नजस्येवसदातत्रशोकस्या
वसरःकुतः आत्मानम्रियतेजातुजायतेननचवर्द्धते ५ षड्भावरहितोनंतः सत्य
प्रज्ञानविग्रहः आनंदरूपोबुध्यादिसाक्षीलयविवर्जितः ६ एक[illegible]वपरो
ह्यात्मात्यद्वितीयः समस्थितः इत्यात्मानंदृढंज्ञात्वात्यक्त्वाशोकंकुरुक्रियां ७
तैलद्रोण्यांपितुर्देहमुद्धृत्यसचिवैःसह कृत्यंकुरुयथान्याय्यंमस्माभिःकुलनं ३५
दन इतिसंबोधितः साक्षाद्गुरुणा भरतस्तदा विसृज्याज्ञानजंशोकंचक्रे
सविधिवत्क्रियां ९ गुरुणोक्तप्रकारेणआहिताग्नेर्यथाविधि संस्कृत्यस

र
पितुर्देहं विधिदृष्टेन कर्मणा ११० एकादशेऽहनि प्राप्ते ब्राह्मणान्वेदपारगान्
भोजयामास विधिवच्छतशोऽथ सहस्रशः ११ उद्दिश्य पितरं तत्र ब्राह्मणेभ्यो धन
नं बहु ददौ गवां सहस्राणि ग्रामान्रत्नांबराणि च १२ अवसत्स्वगृहे तत्र राम
मेवानुचिंतयन् वसिष्ठेन सह श्रात्रामंत्रिभिः परिवारितः १३ रामेरण्ये प्रयाते
सहजनकसुतालक्ष्मणाभ्यां सुघोरं मातामेराक्षसीव प्रदहति हृदयं दर्शनादे
वसद्यः गत्वाम्पारण्यमध्ये स्थिरमतिरखिलं दूरतोऽपास्य राज्यं रामे सीतासमेतं
स्थितरुचिरसुखं नित्यमेवानुसेवे १४ इति श्रीमदध्यात्मरामायणे उमाम
हेश्वरसंवादे अयोध्याकांडे सप्तमः सर्गः ७ श्रीमहादेव उवाच वसिष्ठे मुनि
भिः सार्धं मंत्रिभिः परिवारितः राज्ञः सभां देवसभां निभाम सविज्ञाद्विभुः १
स

अयो॰ ८ तत्रासनेसमासीनश्चतुर्मुखइवापरः आनीयभरतंतत्र उपवेश्यसहानुजं २ अब्र
३६ वीद्वचनंदेशकालोचितमरिंदमं वत्सराज्येभिषेक्ष्यामस्त्वामद्यपितृशासनात्
३ कैकेय्यायाचितंराज्यंत्वदर्थंपुरुषर्षभ सत्यसंधोदशरथः प्रतिज्ञायददौ
किल ४ अभिषेकोभवत्वद्यमुनिभिर्मंत्रपूर्वकं तच्छ्रुत्वा भरतोथाह ममराज्ये
नकिंमुने ५ रामोराजाधिराजश्चवयंतस्यैवकिंकराः श्वःप्रभातेगमिष्यामोरा
ममानेतुमंजसा ६ अहंयूयंमातरश्चकैकेयींराक्षसींविना हनिष्याम्यधुनै
वाहंकैकेयींमातृगंधिनीं ७ किंतुमांनोरघुश्रेष्ठः स्त्रीहंतारंसहिष्यते नं ३६
नूतेगमिष्यामिपादचारेणदंडकान् ८ शत्रुघ्नसहितः स्तूर्णंयूयमायांतुवा
नवा रामोयथावनेयातस्तथाहंवल्कलांबरः ९ फलमूलकृताहारः शत्रुघ्न
३ मातृत्वसंबंधवतीमपिहनिष्यामि। तादृश्यावधस्यैवोचितत्वात्। किंतु स्त्रीहंतारंमांरघुश्रेष्ठः

नोसहिष्यतेनं सहिष्यते। ३ नीत हनिष्यामीति भावः॥

स

हितोमुने भूमिवृणायीजटाधारीयावद्रामोनिवर्त्तते १० इतिनिश्चित्यभरतस्तूष्णीमे
वावतस्थिवान् साधुसाध्वितितंसर्वेप्रशशंसुर्मुदान्विताः ११ ततःप्रभातेभरतं
गच्छंतंसर्वसैनिकाः अनुजग्मुः सुमंत्रेणनोदिताःसाश्वकुंजराः १२ कौसल्याद्या
राजदाराः वसिष्ठप्रमुखाद्विजाः छादयंतोभुवंसर्वेपृष्ठतःपार्श्वतोग्रतः १३ शृं
गवेरपुरंगत्वागंगाकूलेसमंततः उवासमहतीसेनाशत्रुघ्नपरिचोदिता १४ आ
गतंभरतंश्रुत्वागुहःशंकितमानसः महत्यासेनयासार्धमागतोभरतःकिल १५
पापंकर्त्तुंनवायातिरामस्याविदितात्मनः गत्वात्तद्धृदयंज्ञेयंयदिदुष्टस्तारिष्यति
१६ गंगांनौभिस्समाकृष्यनावस्तिष्ठंतुसायुधाः ज्ञातयोमेसमायत्ताःपश्यंतःसर्वतोदि
शं १७ इतिसर्वान्समादिश्यगुहोभरतमागतः उपायनानिसंगृह्यविविधानिबहून्य

अयो० ८ पि १८ प्रययौज्ञातिभिः सार्धंबहुभिर्विविधायुधैः निवेश्योपायनान्यग्रे भरतस्य
समंततः १९ दृष्ट्वाभरतमासीनंसहमंत्रिभिः चीरांबरंघनश्यामंजटामुकुट
२० धारिणं २० राममेवानुशोचंतंरामरामेतिवादिनं ननामशिरसाभूमौगुहोह
मितिचाब्रवीत् २१ शीघ्रमुत्थाप्यभरतोगाढमालिंग्यसादरं पृष्ट्वानामयमव्यग्रः
सखायमिदमब्रवीत् २२ भ्रातस्त्वंराघवेणात्रसमेतःसमवस्थितः रामेणालिंगि
तःसार्द्रनयनेनामलात्मना २३ धन्योसिकृतकृत्योसियत्त्वयापरिभाषितः ए
मोराजीवपत्राक्षोलक्ष्मणेनचसीतया २४ यत्ररामस्त्वयादृष्टस्तत्रमांनयसुव्र
त सीतयासहितोयत्रसुप्तस्तद्दर्शयस्वमे २५ त्वंरामस्यप्रियतमोतभक्तिमान
सिभाग्यवान् इतिसंस्मृत्यसंस्मृत्यरामंसाश्रुविलोचनः २६ गुहेनसहित २७

=२ सीताभरणघर्षणेनसंलग्नाये स्वर्णबिंदवस्तैः अंचितंयुतं

स्तत्रयरामःस्थितोनिशि ययौदद्दर्शशयनस्थलंकुशसमास्तृतं २७ सीताभ
रणसंलग्नस्वर्णबिंदुभिरंचितं दुःखसंतप्तहृदयो भरतःपर्यदेवयत् २८ अहोतिसु
कुमारीयासीताजनकनंदिनी प्रासादेरत्नपर्यंकेकोमलास्तरणेशुभे २९ रामेणसहि
तासेतेसाकथंकुशविष्टरे सीतारामेणसहितादुःखेनममदोषतः ३० धिङ्मांजातो
स्मिकैकेय्यांपापराशिसमाननः मन्निमित्तमिदंक्लेशंरामस्यपरमात्मनः ३१ अहो
तिसफलंजन्मलक्ष्मणस्यमहात्मनः राममेवसदान्वेतिवनस्थमपिहृष्टधीः ३२
अहंरामस्यदासायेतेषांदासस्यकिंकरः यदिस्यांसफलंजन्ममममभूयान्नसंशयः
३३ भ्रातर्जानासियदितत्कथयस्वममाखिलं यत्रतिष्ठतितत्राहंगच्छाम्यानेनुमंजसा
३४ गुहस्तंमुद्धृद्यंज्ञात्वासस्नेहमब्रवीत् देवत्वमेवधन्योसियस्यतेभक्तिरीदृशी
३५

अयो ८ रामेराजीवपत्राक्षेसीतायांलक्ष्मणेतथा चित्रकूटाद्रिनिकटेमंदाकिन्याविदूरतः ३६ मु
३८ नीनामाश्रमपदेरामस्तिष्ठतिसानुजः जानक्यासहितोनंदात्सुखमास्तेकिलप्रभुः ३७ किल
तत्रगच्छामहेशीघ्रंगंगांतर्त्तुमिहार्हसि इत्युक्त्वात्वरितंगत्वानावःपंचशतानिहि ३८ पादपूरणे
समानयत्ससैन्यस्यतर्त्तुंगंगांमहानदीं स्वयमेवानिनायेकांराजनावंगुहस्तदा ३९
आरोप्यभरतंतत्रशत्रुघ्नंराममातरं वसिष्ठंचतथान्यत्रकैकेय्यांश्चान्ययोषितः ४०
तीर्त्वागंगांययौशीघ्रंभरद्वाजाश्रमंप्रति दूरेस्थाप्यमहासैन्यंभरतःसानुजोययौ ४१
आश्रमेमुनिमासीनंज्वलंतमिवपावकं दृष्ट्वाननामभरतःसाष्टांगमतिभक्तितः ४२
ज्ञात्वादाशरथिंप्रीत्यापूजयामासमौनिराट् पप्रच्छसकुलंदृष्ट्वाजटावल्कलधारिणं ३८
४३ राज्यंप्रशासतस्तेद्यकिमेतद्वल्कलादिकं आगतोसिकिमर्थंत्वंविपिनंमुनिसे

वितं ४४ भरद्वाजवचः श्रुत्वा भरतः साश्रुलोचनः सर्वं जानासि भगवन् सर्वभूताशय
स्थितः ४५ तथापि पृच्छसे किंचित्तदनुग्रह एव मे कैकेय्या यत्कृतं कर्म रामराज्यवि
घातनं ४६ वनवासादिकं वापि न हि जानामि किंचन भवत्पादयुगं मे ऽद्य प्रमाणं मुनि
सत्तम ४७ इत्युक्त्वा पादयुगलं मुनेः स्पृष्ट्वार्त्तमानसः ज्ञातुमर्हसि मां देव शुद्धो वाशु इत्याहेति शेषः।
ष्ठति राजनि द्ध एव वा ४८ मम राज्येन किं स्वामिन् रामे ति[illegible] किंकरोहं मुनिश्रेष्ठ रामचं
द्रस्य शाश्वतः ४९ अतो गत्वा मुनिश्रेष्ठ रामस्य चरणांतिके पतित्वा राज्यसंभारान् सम ॥१॥
र्प्यात्रैव राघवे ५० अभिषेक्ष्ये वसिष्ठाद्यैः पौरजानपदैः सह नेष्येऽयोध्यां रमानाथं
सदा सेवेति नीचवत् ५१ इत्युदीरितमाकर्ण्य भरतस्य वचो मुनिः आलिंग्य मूर्ध्न्यव
घ्राय प्रज्ञातो सस्मविस्मयः ५२ वत्स ज्ञातं पुरैवैतद्भविष्यं ज्ञानचक्षुषा मा शुचस्त्वं प

अयो॰ ८ रामभक्तः श्रीरामे लक्ष्मणादपि ५३ आतिथ्यं कर्तुमिच्छामि ससैन्यस्य तवानघ अ
घमनुज्ञां ससैन्यस्त्वं भोगं ता रामसन्निधिं ५४ यथाज्ञापयति भगवांस्तथेति भरतो ति
२९ भरद्वाजस्तपःस्रष्टा मौनी होमस्थले स्थितः ५५ दध्यौ कामदुघां कामवर्षिणीं कामदो मुनिः तोब्रवीत्
असृजत्कामधुक्सर्वं यथाकाममलौकिकं ५६ भरतस्य ससैन्यस्य यथेष्टं च मनोर
थं वसिष्ठं पूजयित्वाग्र्यं शास्त्रदृष्टेन कर्मणा ५७ पश्चात्ससैन्यं भरतं तर्पयामास
ते योगिराट् उषित्वा दिनमेकं वै आश्रमे स्वर्गसन्निभे ५८ अभिवाद्य पुनः प्रातर्भरद्वा
जं सहानुजः भरतस्तत्कृतानुज्ञः प्रययौ रामसन्निधिं ५९ चित्रकूटमनुप्राप्य दूरे सं
स्थाप्य सैनिकान् रामसंदर्शनाकांक्षी प्रययौ भरतः स्वयं ६० शत्रुघ्नेन सुमंत्रेण गुह
नेन च परंतपः तपस्विमंडलं सर्वं विचिन्वानोन्यवर्तत ६१ अदृष्ट्वा रामभवनमप्र ३९
निवृत्तव्यापारस्त्वासीत्तु।

छंॠषिमंडलं कुत्रास्तेसीतयासार्धंलक्ष्मणेनरघूत्तमः ६२ ऊचुरग्रेगिरेः पश्चाद्गंगा
याः उत्तरेतटे विविक्तंरामसदनंरम्यंकाननमंडितं ६३ सफलैराम्रपनसैःक
द ली खंडसंस्कृतं चंपकैःकोविदारैश्चपुन्नागैर्विपुलैस्तथा ६४ एवंदर्शितमार्गो
ऽयंमुनिभिर्भरतोग्रतः हर्षाद्ययोरघुश्रेष्ठभवनंमंत्रिणासह ६५ ददर्शदूराद्दति
भासुरंशुभंरामस्यगेहंमुनिवृंदसेवितं वृक्षाग्रसंलग्नसुवल्कलाजिनंरामाभि
श्री रामंभरतः सहानुजः ६६ इतिश्रीमध्यात्मरामायणेअयोध्याकांडेअष्टमः सर्गः ८
श्रीमहादेवउवाच अथगत्वाश्रमपदसमीपंभरतोमुदा सीतारामपदैर्युक्तंप
वित्रमतिशोभनं १ सतत्रवज्रांकुशवारिजांचितध्वजादिचिन्हानिपदानिसर्व
तः ददर्शरामस्यभुवोतिमंगलान्यचेष्टयत्पादरजःसुसानुजः २ अहोसुधन्यो
सानुजः पादरजः सुअचेष्टयत् लुलुठे

रामेश्वरमयासितार्जिमम ॥ ५

अयो° ९ हममूनिरामपद्मारविंदांकितभूतलानि पश्यामियत्पादरजोविमृग्यंब्रह्मादिदे
५० वैःश्रुतिभिश्चनित्यं ३ इत्यद्भुतप्रेमरसाप्लुताशयोविगाढचेतारघुनाथभावने
आनंदजाश्रुस्नपितस्तनांतरःशनैरवापाश्रमसन्निधिंहरेः ४ सतत्रदृष्ट्वारघु
पते ४ नाथमास्थितंदूर्वादलश्यामलमौक्षणं जटाकिरीटंनववल्कलांबरंप्रसन्नवक्त्रं
तरुणारुणद्युतिं ५ विनोदयंतंजनकात्मजांमुहुःसौमित्रिणासेवितपादपंकजं॥
तदाभिदुद्रावरघुत्तमंशुचाहर्षाच्चतत्पादयुगंत्वराग्रहीत ६ रामस्तमाकृष्यसु
दीर्घबाहुर्दोर्भ्यांपरिष्वज्यविषिंच्यनेत्रजैः जलैरथांकोपरिसंन्यवेशयतपुनःपुनः
संपरिषस्वजेविभुः ७ अथतामातरःसर्वाःसमाजग्मुस्त्वरान्विताः राघवंद्रष्टु
कामास्तास्तृषार्तागावोयथाजलं ८ रामःस्वमातरंवीक्ष्यद्रुतमुत्थायपादयोः ववं ५०

देसाश्रुसापुत्र मालिंग्याती वदुःखिता ९ ततस्तान् तथा नत्वा जननीरघुनंदनः ततः
समागतं ददर्शा वसिष्ठं मुनिपुंगवं १० साष्टांगं प्रणिपत्याह धन्योस्मीति पुनःपुनः।
यथा र्हमुपवेश्याह सर्वानेव रघूद्वहः ११ पिता मे कुशली किं वा मां किमाहातिदुःखि
तः वसिष्ठस्तमुवाचेदं पिता ते रघुनंदन १२ त्वद्वियोगाभितप्तात्मा त्वामेव परि
चिंतयन् रामरामेति सीतेति लक्ष्मणेति ममार ह १३ श्रुत्वा तत्कर्णशूलाभं गुरो
र्वचनमंजसा हाहतोस्मीति पतितो रुदन् रामः सलक्ष्मणः १४ ततो नुरुरुदुः सर्वा
मातरश्च तथा परे हा तात मां परित्यज्य क्व गतोसि घृणाकर १५ अनाथोस्मि म
हाबाहो मां को वा लालयेदितः सीता च लक्ष्मणश्चैव विलेपतुरथो भृशं १६ वसि
ष्ठः शांतवचनैः शमयामास तां शुचं ततो मंदाकिनीं गत्वा स्नात्वा ते वीतकल्मषाः
१७

=२इंगुदीतापस्वत्तरुः।

अयो॰ ९ राज्ञेददुर्जलंतत्रसर्वेतेजलकांक्षिणौपिंडान्निर्वापयामासरामोलक्ष्मणसंयु
तः १८ इंगुदीफलपिण्याकरचितान्मधुसंप्लुतान् वयंयदन्नाःपितरस्तदन्नाः
४१ स्मृतिनोदिताः १९ इतिदुःखाश्रुपूर्णाक्षोपुनःस्नात्वागृहंययौ सर्वेरुदित्वा
सुचिरंस्नात्वाजग्मुस्तथाश्रमं २० तस्मिंस्तद्दिवसेसर्वउपवासंप्रचक्रिरे ततः
परेद्युर्विमलेस्नात्वामंदाकिनीजले २१ उपविष्टंसमागम्यभरतोराममब्रवी
त् रामरामम‍हाभागस्वात्मानमभिषेचय २२ राज्यंपालयपित्र्यंतेज्येष्ठ
स्त्वंमेपितायथा क्षत्रियाणामयंधर्मोयत्प्रजापरिपालनं २३ इष्ट्वायज्ञैर्बहु ४१
विधैःपुत्रानुत्पाद्यतंतवे राज्येपुत्रंसमारोप्यंगमिष्यसिततोवनं २४
इदानींवनवासस्यकालोनैवप्रसीदमे मातुर्मेदुष्कृतंकिंचित्स्मर्तुंनार्हसिपा

हिना: २५ इत्युक्त्वा चरणौ भ्रातुः शिरस्याधाय भक्तितः रामस्य पुरतः साक्षाद्दंड
वत्पतितो भुवि २६ उत्थाप्य राघवः श्रीघ्रं मारोप्यांकेति भक्तितः उवाच भरतं रामः
स्नेहार्द्रनयनः शनैः २७ शृणु वत्स प्रवक्ष्यामि यत्वयोक्तं तथैव तत् किंतु माम
ब्रवीत्तातो नव वर्षाणि पंच च २८ उषित्वा दंडकारण्ये पुरं पश्चात्समाविश इदानीं
भरतायेदं राज्यं दत्तं मयाखिलं २९ ततः पित्रैव सुभक्तं राज्यं दत्तं न वैव हि दंडका
रण्यराज्यं मे दत्तं पित्रा तथैव च ३० अतः पितुर्वचः कार्यमावाभ्यामतियत्नतः।
ने पितुर्वचमुल्लंघ्य स्वतंत्रो यस्तु वर्त्तते ३१ भरतस्त्वब्रवीद्रामं कामुको मूढधीः
पिता स्त्रीजितो भ्रांतो न हृद्यप उन्मत्तो यदि वक्ष्यति ३२ तत्सत्यमिति न ग्राह्यं भ्रां
तवाक्यं यथा सुधीः रामउवाच न स्त्रीजितः पिता ब्रूयान्न कामी नैव मूढधीः पूर्वं
को
३ सडीयन्नेव मर्त्ते देहांते निरयं व्रजेत्॥ तस्माद्राज्यं प्रशाधि त्वं वयं दंडकपालकाः॥

अयो॰१ प्रतिश्रुतं तितस्यैस त्यवादी ददौ नृपात् ३४ असत्याद्भीतिरधिकामहतांनरकादपि
४२ करोमीत्यहमप्यन्तसत्यं नस्येप्रतिश्रुतं ३५ कथंवाक्यमहं कुर्यां मसत्यं राघवोहि
सन् इत्युक्तेरिनमाकर्ण्यरामस्य भरतोब्रवीत् ३६ तथैवचीरवसनोवनेवत्स्या
मिसुव्रत चतुर्दशसमास्त्वंतुराज्यंकुरुयथासुखं ३७ श्रीरामउवाच पित्रादत्तं
तवैवैतद्राज्यंमह्यंवनंददौ व्यत्ययंयद्यहं कुर्यामसत्यंपूर्ववत्स्थितं ३८ भरतउ
वाच अहमप्यागमिष्यामि सेवेत्वांलक्ष्मणोयथा नोचेत्प्रायोपवेशेनत्यजाम्ये
तत्कलेवरं ३९ इत्युक्त्वा निश्चयं कृत्वा दर्भानास्तीर्यचातपे मनसापिविनिश्चि
त्यप्राङ्मुखोपविवेशसः ४० भरतस्यातिनिर्बंधं दृष्ट्वारामोतिविस्मितः ने ४२
त्रांतसंज्ञांगुरवेचकाररघुनंदनः ४१ एकांतेभरतंप्राहवसिष्ठोज्ञानिनांवरः

वत्सगुह्यंश्रृणुष्वेदंममवाक्यात्सुनिश्चितं ४२ रामोनारायणःसाक्षाद्ब्रह्मणाया
चितःपुरा रावणस्यवधार्थायजातोदशरथात्मजः ४३ योगमायापिसीतेतिजाता
जनकनंदिनी शेषोपिलक्ष्मणोजातोराममन्वेतिसर्वदा ४४ रावणंहंतुकामा
स्तेगमिष्यंतिनसंशयः कैकेय्यावरदानादियद्यन्निष्ठुरभाषणं ४५ सर्वंदेवकृ
तंनोचेदेवंसाभाषयेत्कथं तस्मात्त्यजाग्रहंतातरामस्यविनिवर्त्तने ४६ निवर्त्तस्व
महासैन्यैर्मंत्रिभिःसहितःपुरं रावणंसकुलंहत्वाशीघ्रमेवागमिष्यति ४७ इति
श्रुत्वागुरोर्वाक्यंभरतोविस्मयान्वितः गत्वासमीपंरामस्यविस्मयोत्फुल्ललोचनः
४८ पादुकेदेहिराजेंद्रराज्यायतवपूजिते तयोःसेवांकरोम्येवयावदागमनंतव
४९ इत्युक्त्वापादुकेदिव्येयोजयामासपादयोः रामस्यतेददौरामोभरतायातिभ

अयो० ९ क्तिनः ५० गृहीत्वापादुकेदिव्येभरतोरत्नभूषिते रामंपुनःपरिक्रम्यप्रणनामपुनः
पुनः ५१ भरतंपुनराहेदंभक्त्यागद्गदयागिरा नवपंचसमांतेतुप्रथमेदिवसेयदि
४२ ५२ नागमिष्यसिचेद्रामप्रविशामिमहानलं बाढमित्येवतंरामोभरतंसंन्यवर्त्त
यत् ५३ ससैन्यःसवसिष्ठश्चशत्रुघ्नसहितःसुधीः मातृभिर्मंत्रिभिःसार्धंगम
व नायोपचक्रमे ५४ कैकेयीराममेकांते स्रवन्नेत्रजलाकुला प्रांजलिःप्राहहेरामत
वराज्यविघातनं ५५ कृतंमयादुष्टधियामायामोहितचेतसा क्षमस्वममदौरात्म्यं
क्षमासाराहिसाधवः ५६ त्वंसाक्षाद्विष्णुरव्यक्तःपरमात्मासनातनः ५७ माया ४२
मनुष्यरूपेणमोहयस्यखिलंजगत् त्वयैवप्रेरितोलोकःकुरुतेसाध्वसाधुवा ५८
त्वदधीनमिदंविश्वमस्वतंत्रंकरोतिकिं यथाकृत्रिमनर्त्तक्योनृत्यंतिकुहकेच्छया
५९

म

त्वदधीनस्तथामायानर्तकीबहुरूपिणी त्वयैवप्रेरिताहंचदेवकार्यंकरिष्यता ५९ पा
पापिष्ठंपापमनसाकर्मोच रमरिंदम अद्यप्रभृतिनोसीमेदेवानामप्यगोचरः ६० पा
हिविश्वेश्वरानंतजगन्नाथनमोस्तुते छिंधिस्नेहमयंपाशंपुत्रवित्तादिगोचरं ६१
त्वज्ज्ञानामलखड्गेनत्वामहंशरणंगता कैकेय्यावचनंश्रुत्वारामःसस्मितमब्र
दा वीत् ६२ यथास्यमांमहाभागेनानृतंसत्यमेवतत् मयैवप्रेरितावाणीतववक्त्रा
द्विनिर्गता ६३ देवकार्यार्थसिध्यर्थमत्रदोषःकुतस्तव गच्छत्वंहृदिमांनित्यंभावयं
तीदिवानिशं ६४ सर्वत्रविगतस्नेहामद्भक्त्यामोक्ष्यसेचिरात् अहंसर्वत्रसमदृक्
द्वेष्योवाप्रियएववा ६५ नास्तिमेकल्पकस्येवभजतोनुभजाम्यहं मन्मायामोहित
धियोमामंबमनुजाकृतिं ६६ सुखदुःखाद्यनुगतंजानंतिनतुतत्वतः दिष्ट्यामद्दो

अयो॰ ९ चरं ज्ञाने उत्पन्ने ते भवा पहं ६७ स्मरंतीतिष्ठ भवने लिप्य सेन्न चकर्मभिः इत्युक्त्वा र
साप रिक्रम्य रामं सानंद विस्मया ६८ प्रणम्य प्रज्ञतशो भूमौ ययौ गेहं मुदान्विता भ
५४ रत स्तु सहामात्यै र्मातृ भिर्गुरुणा सह ६९ अयोध्या मगमत् क्षिप्रं राममेवानुचिंतय
न् पौर जान पदा न्सर्वा नयोध्या या मुदार धीः ७० स्थापयित्वा यथा न्यायं नंदिग्रा
मे ययौ स्वयं तत्र सिंहासने नित्यं पादुके स्थाप्य भक्तितः ७१ पूजयित्वा यथा रामं
गं धपुष्पाक्षतादिभिः राजोपचारै रखिलैः प्रत्यहं नियतव्रतः ७२ फलमूला
शनो दांतो जटा वल्कल धारकः अधः शायी ब्रह्मचारी शत्रुघ्न सहितस्तदा ७३
राजकार्याणि सर्वाणि यावंति पृथिवीतले तानि पादुकयोः सम्यक् निवेदयति रा ५४
घवः ७४ गणयन् दिवसानेव रामागमन कांक्षया स्थितो रामार्पितमनाः सा

क्षाद्ब्रह्ममुनिर्यथा ७५ रामस्तुचित्रकूटाद्रौवसन्मुनिभिरावृतः सीतयालक्ष्म
णेनापिकिंचित्कालमुपावसत् ७६ नागराश्चसदायांतिरामदर्शनलालसाः चि
त्रकूटेस्थितंज्ञात्वासीतयालक्ष्मणेनच ७७ दृष्ट्वानानजनसंबाधंरामस्तत्याजतंगि॥
रिं दंडकारण्यमगेनेकार्यमप्यनुचिंतयन् ७८ अन्वगात्सीतयाभ्रात्राह्यत्रेराश्रम
मुत्तमं सर्वर्तुसुखसंवासंजनसंबाधवर्जितं ७९ गत्वामुनिमुपासीनंभास्वयं
तंतपोधनं दंडवत्प्रणिपत्याहरामोहमभिवादये ८० पितुराज्ञांपुरस्कृत्यदंडका।
नहमागतः वनवासमिषेणापिधन्योहंदर्शनात्तव ८१ श्रुत्वारामस्यवचनंरा
मंज्ञात्वाहरिंपरं पूजयामासविधिवद्भक्त्यापरमयामुनिः ८२ वन्यैःफलैःकृता
तिथ्यमुपविष्टंरघूत्तमं सीतांचलक्ष्मणंचैवसंतुष्टोवाक्यमब्रवीत् ८३ भार्या

न

मेतीवसंवृद्धाह्यनुसूयेतिविश्रुता तपश्चरंतीसुचिरं धर्मज्ञाधर्मवत्सला ८४

अयो० ९ ऽंतस्तिष्ठतितांसीतापश्यत्वरिनिषूदन तथेतिजानकींप्राहरामोराजीवलो

४५ चनः ८५ गछदेवींनमस्कृत्यशीघ्रमेहिपुनःशुभे तथेतिरामवचनंसीता

चापितथाकरोत् ८६ दंडवत्पतितामग्रेसीतांदृष्ट्वातिहृष्टधीः अनुसूया न

सीतेरतिछेदःसंधिरार्षः। समालिंग्यवत्सेसीतेतिसादरं ८७ दिव्येददौकुंडलेद्वेनिर्मितेविश्वकर्मणा

दुकूलेद्वेददौतस्यैनिर्मलेभक्तिसंयुता ८८ अंगरागंचसीतायैददौदिव्यंशु

भाननानत्यक्ष्यतेंगरागेणशोभात्वांकमलानने ८९ पातिव्रत्यंपुरस्कृत्यराम ४५

मन्वेहिजानकि कुशलीराघवोतुत्वयासहपुनर्गृहं ९० भोजयित्वायथान्या

येरामंसीतासमन्वितं लक्ष्मणंचतदारामंपुनःप्राहकृतांजलिः ९१

या

एवं त्वमेव भुवनानि विधाय तेषां संरक्षणाय सुरमानुषतिर्यगादीन् देहान्
बिभर्षि न च देहगुणैर्विलिप्तस्त्वत्तो विभेत्यखिलमोहकरी च माया ९२ इ
ति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकांडे नवमः सर्गः
९ श्रीसमाप्तः॥ श्रीरस्तु॥ शुभं भवतु॥ श्रीरामजय॥

॥अयोध्याकांड समाप्तः॥

[OrderDescription]
,CREATED=13.07.20 14:55
,TRANSFERRED=2020/07/13 at 15:06:15
,PAGES=93
,TYPE=STD
,NAME=S0003298
,Book Name=M-2499-RAMAYAN AYODHYAKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,